एहि मे पुत्रक! आलिङ्ग।
(*इत्यङ्के उपवेश्य*)
अनुकृतमनेन पितुः रूपम्।

रदनिका - **न केवलं रूपं, शीलमपि तर्कयामि। एतेन आर्यचारुदत्त आत्मानं विनोदयति।**

वसन्तसेना - **अथ किन्निमित्तमेष रोदिति?**

रदनिका - **एतेन प्रातिवेशिकगृहपतिदारकस्य सुवर्णशकटिकया क्रीडितम्। तेन च सा नीता। ततः पुनस्तां मार्गयतो मयेयं मृत्तिकाशकटिका कृत्वा दत्ता। ततो भणति रदनिके! किम्मम एतया मृत्तिकाशकटिकया? तामेव सौवर्णशकटिकां देहि इति।**

वसन्तसेना - **हा धिक् हा धिक्! अयमपि नाम परसम्पत्त्या सन्तप्यते? भगवन् कृतान्त। पुष्करपत्रपतित-जलबिन्दुसदृशैः क्रीडसि त्वं पुरुषभागधेयैः।** (*इति सास्रा*)**। जात! मा रुदिहि! सौवर्णशकटिकया क्रीडिष्यसि।**

दारकः - **रदनिके! का एषा?**

रदनिका - **जात! आर्या ते जननी भवति।**

दारकः - **रदनिके! अलीकं त्वं भणसि। यद्यस्माकमार्या जननी तत् केन अलङ्कृता?**

वसन्तसेना - **जात! मुग्धेन मुखेन अतिकरुणं मन्त्रयसि।**
(नाट्येन आभरणान्यवतार्य रोदिति)
एषा इदानीं ते जननी संवृत्ता। तद् गृहाणैतमलङ्कारकम्, सौवर्णशकटिकां घटय।

दारकः - **अपेहि, न ग्रहीष्यामि। रोदिषि त्वम्।**

वसन्तसेना - *(अश्रूणि प्रमृज्य)*
जात! न रोदिष्यामि। गच्छ, क्रीड।
(अलङ्कारैर्मृच्छकटिकां पूरयित्वा)
जात! कारय सौवर्णशकटिकाम्।
(इति दारकमादाय निष्क्रान्ता रदनिका)

शब्दार्थाः टिप्पण्यश्च

दारकम्	–	बालकम्, पुत्रकम्, बच्चे को।
शकटिकया	–	वाहनविशेषेण, गाड़ी के द्वारा।
मृत्तिकाशकटिकया	–	मृत्तिकानिर्मितया गन्त्र्या, मिट्टी की गाड़ी से।
सौवर्णशकटिकाम्	–	सुवर्णनिर्मितां गन्त्रीम्, सोने की गाड़ी को।
सुवर्णव्यवहारः	–	स्वर्णस्य आदानं प्रदानम्, सोने की लेन-देन।
विनोदयामि	–	अनुरञ्जयामि, बहलाती हूँ।
उपसर्पिष्यामि	–	पार्श्वमुपगमिष्यामि, पास पहुँचती हूँ।
किन्निमित्तम्	–	किमर्थम्, किस लिये, किस बात के लिये।
प्रातिवेशिकः	–	प्रतिवेशे निकटे स्थितः, पड़ोस में रहने वाला।
मार्गयतः	–	अन्विष्यतः, खोजने वाले का।
परसम्पत्त्या	–	अन्यस्य समृद्ध्या, पराई समृद्धि से।
सन्तप्यते	–	दुःखमनुभवति, सन्तप्त हो रहा है।
पुष्करपत्रम्	–	कमलपत्रम्, कमल का पत्ता।
पुरुषभागधेयैः	–	मनुष्यस्य भाग्यैः, मनुष्य के भाग्य के साथ।
अलीकम्	–	असत्यम्, झूठ
अलङ्कृता	–	विभूषिता, आभूषण पहने हुई।
मुग्धेन मुखेन	–	कोमलेन (निर्दोषेण) मुखेन, भोले मुख से।

आभरणानि	–	आभूषणानि, गहनों को।
घटय	–	निर्मापय, बनवा लो।
अपेहि	–	दूरीभव, दूर हटो।
प्रमृज्य	–	सारयित्वा, पोंछ कर।
निष्क्रान्ता	–	बहिर्गता, बाहर निकल गई।

अभ्यासः

1. संस्कृतेन उत्तरं दीयताम् ।

(क) मृच्छकटिकम् इति नाटकस्य रचयिता कः?
(ख) दारकः (रोहसेनः) रदनिकां किमयाचत?
(ग) वसन्तसेना दारकस्य विषये किं पृच्छति?
(घ) रदनिका किमुक्त्वा दारकं तोषितवती?
(ङ) रोहसेनः कस्य पुत्रः आसीत्?
(च) आर्यचारुदत्तः केन आत्मानं विनोदयति?
(छ) रोहसेनः कीदृशीं शकटिकां याचते?
(ज) वसन्तसेना कैः मृच्छकटिकां पूरयति?
(झ) रोहसेनेन स्वपितुः किम् अनुकृतम्?
(ञ) वसन्तसेना किमुक्त्वा दारकं सान्त्वयामास?

2. हिन्दीभाषया व्याख्यां लिखत ।

(क) अनलङ्कृतशरीरोऽपि चन्द्रमुख आनन्दयति मम हृदयम्।
(ख) न केवलं रूपं शीलमपि तर्कयामि।
(ग) पुष्करपत्रपतितजलबिन्दुसदृशैः क्रीडसि त्वं पुरुषभागधेयैः।
(घ) जात! मुग्धेन मुखेन अतिकरुणं मन्त्रयसि।

3. अधोलिखितानां पदानां स्वसंस्कृतवाक्येषु प्रयोगं कुरुत ।

मृत्तिकाशकटिकया, सुवर्णव्यवहारः, अश्रूणि, विनोदयति, प्रातिवेशिकः ऋद्ध्या, रोदिति।

4. अधोलिखतानां क्रियापदानि वीक्ष्य समुचितं कर्तृपदं लिखत ।

(क) .... क्रीडावः।
(ख) .... विनोदयामि।
(ग) .... सुवर्णशकटिकया क्रीडिष्यसि।

(घ) .... अलीकं भणसि।
(ङ) किं निमित्तम् .... रोदिति।

5. **अधोलिखितानां पदानां सन्धिविच्छेदं कुरुत ।**

(क) कुतोऽस्माकम् = ...
(ख) पुनरपि = ...
(ग) किन्निमित्तम् = ...
(घ) पुनस्ताम् = ...
(ङ) यद्यस्माकम् = ...
(च) आभरणान्यवतार्य = ...

6. **निर्दिष्टप्रकृतिप्रत्ययनिर्मितं पदं लिखत ।**

(क) निः + श्वस् + ल्यप् = ...
(ख) अनु + कृ + क्त = ...
(ग) अलम् + कृ + क्त + टाप् = ...
(घ) अव + तृ + णिच् + ल्यप् = ...
(ङ) पूर् + क्त्वा = ...
(च) आ + दा + ल्यप् = ...
(छ) ग्रह् + क्त्वा = ...
(ज) उप + सृ + ल्यप् = ...
(झ) क्रीड् + क्त = ...
(ञ) प्र + मृज् + ल्यप् = ...

7. **अधोलिखितानां पदानां विलोमपदानि लिखत ।**

(क) सौवर्णशकटिका = ...
(ख) अलीकम् = ...
(ग) अलङ्कृता = ...
(घ) निष्क्रान्ता = ...
(ङ) अपेहि = ...
(च) परसम्पत्त्या = ...

8. **अधोलिखितानां पदानां पर्यायवाचिपदानि लिखत ।**

दारकः, पितुः, तर्कयामि, जननी, नीता, भणति, अलीकम्।

9. अधोलिखिताः पङ्क्तयः केन कं प्रति उक्ताः ।

(क) एहि वत्स! शकटिकया क्रीडावः।
(ख) आर्यायाः वसन्तसेनायाः समीपम् उपसर्पिष्यामि।
(ग) एहि मे पुत्रक! आलिङ्ग।
(घ) किं निमित्तं एष रोदिति।
(ङ) रदनिके! का एषा।
(च) जात! कारय सौवर्णशकटिकाम्।

10. पाठमाश्रित्य सोदाहरणं वसन्तसेनायाः रोहसेनस्य च चारित्रिकवैशिष्ट्यं हिन्दीभाषायां लिखत ।

योग्यताविस्तारः

(क) सौवर्णशकटिका इति पाठस्य साभिनयं नाट्यप्रयोगं कुरुत ।

षष्ठः पाठः

आहारविचारः

11116CH06

प्रस्तुत पाठ **चरकसंहिता** के **'विमानस्थानम्'** प्रकरण के **'रसविमान'** नामक प्रथम अध्याय से संकलित है। यहाँ प्रयुक्त विमान शब्द का तात्पर्य रोगात्मक दोषों एवं ओषधियों के विज्ञान से है। इसमें बताया गया है कि स्वास्थ्य का मूल आधार समुचित आहार है। भोजन के प्रकार, उसकी मात्रा तथा उचित समय आदि का विधान ही इस अंश का वर्ण्य विषय है।



उष्णमश्नीयात्, उष्णं हि भुज्यमानं स्वदते, भुक्तं चाग्निमौदर्यमुदीरयति, क्षिप्रं जरां गच्छति, वातमनुलोमयति, श्लेष्माणं च परिह्रासयति, तस्मादुष्णमश्नीयात्।

स्निग्धमश्नीयात्, स्निग्धं हि भुज्यमानं स्वदते, क्षिप्रं जरां गच्छति, वातमनुलोमयति, शरीरमुपचिनोति, दृढीकरोतीन्द्रियाणि, बलाभिवृद्धि-मुपजनयति, वर्णप्रसादं चाभिनिर्वर्तयति; तस्मात् स्निग्धमश्नीयात्।

मात्रावदश्नीयात्, मात्रावद्धि भुक्तं वातपित्तकफानपीडयदायुरेव विवर्धयति केवलं सुखं विपच्यते, न चोष्माणमुपहन्ति, अव्यथं च परिपाकमेति, तस्मान्मात्रावदश्नीयात्।

जीर्णेऽश्नीयात् अजीर्णे हि भुञ्जानस्याभ्यवहृतमाहारजातं पूर्वस्याहारस्य रसमपरिणतमुत्तरेणाहार-रसेनोपसृजत् सर्वान् दोषान् प्रकोपयत्याशु, जीर्णे तु भुञ्जानस्य स्वस्थानस्थेषु दोषेष्वग्नौ चोदीर्णे जातायां च बुभुक्षायां विवृतेषु च स्रोतसां मुखेषु विशुद्धे चोद्‌गारे हृदये विशुद्धे वातानुलोम्ये विसृष्टेषु च वातमूत्रपुरीषवेगेषु अभ्यवहृतमाहारजातं सर्वशरीरधातूनप्रदूषयदायुरेवाभिवर्धयति केवलम्, तस्माज्जीर्णेऽश्नीयात्।

वीर्याविरुद्धमश्नीयात्, अविरुद्धवीर्यमश्नन् हि विरुद्धवीर्याहार-जैर्विकारैर्नोपसृज्यते। तस्माद् वीर्याविरुद्धमश्नीयात् ।

इष्टे देशे इष्टसर्वोपकरणं चाश्नीयात्। इष्टे हि देशे इष्टैः सर्वोपकरणैः सह भुञ्जानो नानिष्टदेशजैर्मनोविघातकरैर्भावैर्मनोविघातं प्राप्नोति। तस्मादिष्टे देशे तथेष्टसर्वोपकरणं चाश्नीयात्।

नातिद्रुतमश्नीयात्, अतिद्रुतं हि भुञ्जानस्योत्स्नेहनमवसादनं भोजनस्याप्रतिष्ठानं च भोज्यदोषः साद्‌गुण्योपलब्धिः चः न नियता, तस्मान्नातिद्रुतमश्नीयात्।

नातिविलम्बितमश्नीयात्; अतिविलम्बितं हि भुञ्जानो न तृप्तिमधिगच्छति, बहुभुक्तं शीतीभवत्याहारजातं विषमं च पच्यते, तस्मान्नातिविलम्बितमश्नीयात्।

अजल्पन्नहसन् तन्मना भुञ्जीत, जल्पतो हसतोऽन्यमनसो वा भुञ्जानस्य त एव दोषा भवन्ति य एवातिद्रुतमश्नतः, तस्माद-जल्पन्नहसंस्तन्मना भुञ्जीत।

शब्दार्थाः टिप्पण्यश्च

आहारः	–	आ + हृ + घञ् = भोजन।
औदर्यम्	–	उदर + यत्, उदर्य + अण्, उदरे भवः, (उदर में होने वाला) पेट की अग्नि का विशेषण।
वर्णप्रसादं चाभिनिर्वर्तयति	–	रंग रूप में, सौन्दर्य में निखार लाता है।
क्षिप्रं जरां गच्छति	–	जल्दी पच जाता है।
स्निग्धम्	–	स्निह् + क्त, चिकनाई घृत तैलादि से युक्त।
मात्रावत्	–	मात्रा + मतुप्, उचित मात्रा में।
उपचिनोति	–	उप् + चि + लट् + प्र.पु., ए.व., बढ़ाता है।
अव्यथम्	–	व्यथया रहितं यथा स्यात् तथा, अव्ययीभाव, क्रियाविशेषण, बिना कष्ट के सरलता से।
परिपाकम्	–	परि + पच् + घञ्, हाजमे को।
अजीर्णे	–	जॄ + क्त, न जीर्णे इति नञ् तत्पुरुष, न पचने पर।
अभ्यवहृतम्	–	अभि + अव + हृ + क्त, खाया हुआ।
उपसृजत्	–	उप + सृज् + शतृ, मिलता हुआ।
बुभुक्षा	–	भोक्तुम् इच्छा, भुज् + सन् + टाप्, भोजन की इच्छा।
विवृतम्	–	वि + वृ + क्त, खुला हुआ।
प्रकोपयत्याशु	–	शीघ्रता से बढ़ाता है।
विसृष्टेषु	–	वि + सृज् + क्त, सप्तमी बहुवचन, त्यागने पर, विसर्जन के उपरान्त।
उपसृज्यते	–	उप + सृज् + कर्मवाच्य, लट् लकार, प्र.पु. ए.व., ग्रस्त होता है।
इष्टसर्वोपकरणम्	–	इच्छित समस्त द्रव्य जैसे–चटनी, अचार आदि।
वातानुलोम्ये	–	वायु के अनुकूल होने पर।
इष्टम्	–	इष् + क्त, इच्छित।
अवसादनम्	–	अव + सद् + णिच् + ल्युट्, कष्टकारक।
उत्स्नेहम्	–	उल्टे मार्ग की ओर जाना, डकार आना, उल्टी होना।

अप्रतिष्ठानम् – न प्रतिष्ठानम्, नञ् तत्पुरुष, उचित स्थान पर न पहुँचना।

अजल्पत् – न जल्पत्, नञ् तत्पुरुष, बिना बोलते हुए।

मनोविघातम् – मनसः विघातम्, वि + हन् + घञ् द्वितीया एकवचन, तत्पुरुष, मानसिक कष्ट को।

अभ्यासः

1. संस्कृतेन उत्तरत।

(क) एषः पाठः कस्मात् ग्रन्थात् उद्धृतः?
(ख) चरकसंहितायाः रचयिता कः?
(ग) कीदृशं भोजनम् इन्द्रियाणि दृढीकरोति?
(घ) अजीर्णे भुञ्जानस्य कः दोषः भवति?
(ङ) कीदृशं भोजनं श्लेष्माणं परिह्रासयति?
(च) कीदृशं भोजनं बलाभिवृद्धिम् उपजनयति?
(छ) इष्टसर्वोपकरणं भोजनं कुत्र अश्नीयात्?
(ज) कथं भुञ्जानस्य उत्स्नेहनस्य समाप्तिः न नियता?
(झ) अतिविलम्बितं हि भुञ्जानः कां न अधिगच्छति?
(ञ) जल्पतः हसतः अन्यमनसः वा भुञ्जानस्य के दोषाः भवन्ति?

2. उचितक्रियापदैः रिक्तस्थानानि पूरयत।

(क) बहु भुक्तं आहारजातम् ....
(ख) अजल्पन् अहसन् ....
(ग) उष्णं हि भुज्यमानं ....
(घ) उष्णं भोजनं उदरस्य अग्निम् ....
(ङ) स्निग्धं भुज्यमानं भोजनम् शरीरम् ....
(च) मात्रावद् हि भुक्तं सुखं ....
(छ) अतिद्रुतं हि न ....
(ज) उष्णं भोजनं वातम् ....

3. अधोलिखितपदानां वाक्येषु प्रयोगं कुरुत।

शीघ्रम्, उष्णम्, स्निग्धम्, तैलादियुक्तम्, विवर्धयति, अतिद्रुतम्, अतिविलम्बितम्, पच्यते।

4. अधोलिखितप्रकृतिप्रत्ययविभागं योजयत।

यथा– जॄ + क्त नपुं., प्र. एकवचनम्	=	जीर्णम्।
अश् शतृ पुं. प्रथमा एकवचनम्	=	....
अभि वृध् णिच् लट् प्र. पु. एकवचनम्	=	....
उप + सृज् कर्मवाच्य, लट्, प्र. पु. एकवचनम्	=	....
इष् + क्त पुं. सप्तमी एकवचनम्	=	....
भुज् शानच्, पुं. षष्ठी, एकवचनम्	=	....
न हसन् इति	=	....
प्र + कुप् + णिच् लट्, प्र.पु. एकवचनम्	=	....
जन् + क्त स्त्रीलिङ्गम्	=	....
उप + चि + लट्, प्र. पु. एकवचनम्	=	....
अभि + नि + वृत् + णिच्, लट्लकार, प्र. पु. एकवचनम्	=	....

5. अधोलिखतानां पदानां सन्धिच्छेदं कुरुत।

जीर्णेऽश्नीयात्, चोष्माणं, पूर्वस्याहारस्य, प्रकोपयत्याशु, दोषेष्वग्नौ, अभ्यवहृतम्, तस्माज्जीर्णे, चाश्नीयात्।

6. अधोलिखितेषु पदेषु विभक्तिं वचनं च दर्शयत।

मुखेषु, सर्वान्, हृदये, वृद्धिम्, जराम्, भुञ्जानस्य।

7. पाठात् चित्वा विलोमशब्दान् लिखत।

यथा– विरुद्धम्	अविरुद्धम्
अतिविलम्बितम्	....
जल्पन्	....
हसन्	....
जीर्णे	....
इष्टम्	....
तन्मना:	....
अतिद्रुतम्	....

8. इष्टे देशे .... चाश्नीयात् इत्यस्य गद्यांशस्य आशयं हिन्दी भाषया स्पष्टं कुरुत।

11116CH07

सप्तमः पाठः

सन्ततिप्रबोधनम्

प्रस्तुत पाठ महर्षि अरविन्द द्वारा संस्कृत में प्रणीत खण्डकाव्य **'भवानी भारती'** से संकलित किया गया है। जीवन के प्रारम्भिक चरण में अरविन्द घोष महान क्रान्तिकारी तथा राष्ट्रभक्त के रूप में उभरे। वह सशस्त्र क्रान्ति के समर्थक थे। ब्रिटिश सरकार ने उन्हें अलीपुर बम केस का अपराधी मानकर 1906 ई. में अलीपुर कारागार में बन्दी बना दिया।

कारावास की इसी अवधि में एक रात स्वप्न में बन्दिनी भारतमाता का दर्शन कर, भावाविष्ट मनोदशा में कवि ने इस ओजस्वी तथा राष्ट्रीय भावना से ओत-प्रोत शतककाव्य का प्रणयन किया। इस रचना में महाकवि अरविन्द ने भारतमाता को महाकाली, महालक्ष्मी एवं महासरस्वती के रूप में निरूपित किया है।

जीवन के उत्तरार्ध में महर्षि अरविन्द वेदों के व्याख्याता, महायोगी, महाकवि, परमराष्ट्रभक्त एवं महादार्शनिक के रूप में विश्वमञ्च पर प्रतिष्ठित हुए।

प्रस्तुत पाठ में भारतजननी परतन्त्रता एवं अज्ञानरूपी अन्धकार के बन्धनों में जकड़ी, अवमानना ग्रस्त अपनी सन्ततियों को उनके स्वर्णिम इतिहास का स्मरण कराते हुए, उन्हें प्रेरित करती है कि वे अपनी निद्रा का त्याग करें तथा अपने पराक्रम से राष्ट्र को पराधीनता के बन्धन से मुक्त कराएँ।

सान्द्रं तमिस्रावृतमार्तमन्धं
विलोक्य तद्भारतमार्यखण्डम्।।
गूढा रजन्यामरिभिर्विनष्टा
माता भृशं क्रन्दति भारतानाम्।।1।।

सनातनान्याह्वय भारतानां
कुलानि युद्धाय, जयोऽस्तु नो भीः।
भो जागृतास्मि क्व धनुः क्व खड्गः।
उत्तिष्ठतोत्तिष्ठत सुप्तसिंहाः॥2॥



माताऽस्मि भो! पुत्रक! भारतानां
सनातनानां त्रिदशप्रियाणाम्।
शक्तो न यान्पुत्र विधिर्विपक्षः
कालोऽपि नो नाशयितुं यमो वा॥3॥

ते ब्रह्मचर्येण विशुद्धवीर्याः
ज्ञानेन ते भीमतपोभिरार्याः।
सहस्रसूर्या इव भासुरास्ते
समृद्धिमत्यां शुशुभुर्धरित्र्याम्॥4॥

उत्तिष्ठ भो जागृहि सर्जयाग्नीन्
साक्षाद्धि तेजोऽसि परस्य शौरेः।
वक्षःस्थितेनैव सनातनेन
शत्रून्हुताशेन दहन्नटस्व॥5॥

अस्त्येव लोहं निशितश्च खड्गः
क्रूरा शतघ्नी नदतीह मत्ता।
कथं निरस्त्रोऽसि, मृतोऽसि शेषे
रक्ष स्वजातिं परहा भवाऽऽर्यः॥6॥

भो भो अवन्त्यो मगधाश्च बङ्गा
अङ्गाः कलिङ्गाः कुरुसिन्धवश्च।
भो दाक्षिणात्याः शृणुतान्ध्रचोलाः
शृण्वन्तु ये पञ्चनदेषु शूराः॥7॥

ये केचिदर्चन्ति ननु त्रिमूर्तिं
ये चैकमूर्तिं यवना मदीयाः।
माताऽऽह्वये वस्तनयान्हि सर्वान्
निद्रां विमुञ्चध्वमये शृणुध्वम्॥8॥

शब्दार्थाः टिप्पण्यश्च

सान्द्रम् – सघनम् (सह अन्द्रेण), सघन, गहन।

तमिस्त्रावृतम् – तिमिरावृतम्, तमिस्त्रेण आवृतम् (तृ. तत्पु.), अन्धकार से ढका हुआ।

आर्तम् – पीडितम् दुःखी।

गूढा – निक्षिप्ता, छिपी हुई, डूबी हुई।

भृशम् – अत्यधिकम्, बहुत अधिक।

भीः – भयम्, डर।

नो अस्तु – न भवतु, न हो।

खड्गः	–	असिः, तलवार।
पुत्रक!	–	हे बालक (पुत्र + कन्), हे पुत्र।
त्रिदशप्रियाणाम्	–	देवप्रियाणाम्, (तिस्रः दशाः येषां तेषां) देवताओं के प्रियों का।
विपक्षः	–	शत्रुपक्षः (विरुद्धः पक्षः यस्य सः), शत्रुपक्ष।
विधिः	–	शासनम् शासन।
विशुद्धवीर्याः	–	परिष्कृतपराक्रमाः (विशुद्धं वीर्यं येषां ते), अत्यधिक पराक्रम वाले।
भीमतपोभिः	–	घोरपरिश्रमैः, अत्यधिक परिश्रमों से।
आर्याः	–	श्रेष्ठाः, श्रेष्ठ।
भासुरा	–	भासमानाः (भास् + घुरच् प्रत्यय) दीप्तिमान।
समृद्धिमत्याम्	–	समृद्धियुक्त्याम् समृद्धि + मतुप् + ङीप् स. ए. व., समृद्धिशाली पर।
शुशुभुः	–	शोभायमानाः जाताः (शुभ् लिट् लकार); सुशोभित हुए।
शौरेः	–	कृष्णस्य, शौरि ष. ए. व. (शूर + इञ्), कृष्ण के।
हुताशेन	–	अग्निना, हुतं अश्नाति यः सः तेन, अग्नि के द्वारा।
सर्जय	–	सर्जनं कुरु (सृज् लोट् लकार णिजन्त म. पु. ए. व.), उत्पन्न करो।
शतघ्नी	–	तोपनामाख्यम् अस्त्रम् (शतं हन्ति या सा), तोप।
क्रूरा	–	निष्ठुरा, निष्करुणा, भयंकर।
निशितः	–	उद्दीप्तः (नि + शी + क्त), पैना किया गया।
परहा	–	शत्रुघ्नः (परान् हन्ति), शत्रुओं को मारने वाला।
त्रिमूर्तिम्	–	ब्रह्मविष्णुमहेशाख्यानां देवानाम् मूर्तिम् (त्रयाणां देवानां मूर्तिम्), त्रिदेवों की मूर्ति को।
एकमूर्तिम्	–	एकेश्वरम्, एक निराकार परमेश्वर को।
वः	–	तव, तुम्हारे।
आह्वये	–	आकारयामि, पुकारती हूँ।

अभ्यासः

1. संस्कृतेन उत्तरं दीयताम्।

(क) भारतानां माता कं विलोक्य भृशं क्रन्दति?
(ख) रजन्यां गूढा माता कैः विनष्टा?
(ग) के उत्तिष्ठन्तु?
(घ) पुत्रक! केषां भारतानां माता अस्मि?
(ङ) कः भारतपुत्रान् नाशयितुं शक्तः?
(च) ते (शूराः) केन विशुद्धवीर्याः आसन्?
(छ) त्वं परस्य शौरेः किम् असि?
(ज) कविना कुत्रत्याः कुत्रत्याः शूराः आहूयन्ते?
(झ) मदीया यवनाः कम् अर्चयन्ति?
(ञ) सर्वान् तनयान् का आह्वयति?

2. हिन्दीभाषया आशयं लिखत।

(क) गूढा रजन्यामरिभिर्विनष्टा माता भृशं क्रन्दति भारतानाम्।
(ख) भो जागृतास्मि क्व धनुः क्व खड्गः उत्तिष्ठतोत्तिष्ठत सुप्तसिंहाः।।

3. रिक्तस्थानानि पूरयत।

(क) भारतानां विनष्टा माता ....।
(ख) भो पुत्रक! .... माताऽस्मि।
(ग) भो! उत्तिष्ठ .... सर्जय।
(घ) अहं माता .... आह्वये।
(ङ) ये ....शृण्वन्तु।

4. अधोलिखितेषु विशेष्यविशेषणयोः समुचितं मेलनं कुरुत।

विशेषणम्	विशेष्यम्
(क) क्रूरा	कुलानि
(ख) विनष्टा	धरित्र्याम्
(ग) सनातनानि	खड्गः
(घ) समृद्धिमत्याम्	माता
(ङ) निशितः	तनयान्
(च) सर्वान्	शतघ्नी

5. अधोलिखितानां पदानां वाक्येषु प्रयोगं कुरुत।

उत्तिष्ठ, सर्जय, क्व, सुप्तसिंहा, माता, शत्रून्, रक्ष, बङ्गाः, अर्चन्ति, आह्वये।

6. विभक्तिं योजयित्वा रिक्तस्थानानि पूरयत।

(क) बालिका .... स्वपिति (रजनी, सप्तमीविभक्तिः, एकवचनम्)
(ख) हे वीर! .... उत्तिष्ठ (युद्ध, चतुर्थीविभक्तिः, एकवचनम्)
(ग) ते .... आर्याः जाताः। (तपस्, तृतीयाविभक्तिः, बहुवचनम्)
(घ) माता .... पुत्रान् आह्वयति (सर्व, द्वितीयाविभक्तिः, बहुवचनम्)
(ङ) शूराः .... वसन्ति। (पञ्चनद, सप्तमीविभक्तिः, बहुवचनम्)

7. अधोलिखितेषु यथास्थानं सन्धिं सन्धि-विच्छेदं वा कुरुत।

(क) सनातनानि + आह्वय = ...
(ख) जयोऽस्तु = ... + ...
(ग) भासुराः + ते = ...
(घ) शुशुभुर्धरित्र्याम् = ... + ...
(ङ) जागृतास्मि = ... + ...
(च) स्थितेन + एव = ...
(छ) अस्ति + एव = ...

8. अधोलिखितस्य श्लोकस्य अन्वयं कुरुत।

माताऽस्मि भो! पुत्रक! भारतानां
कुलानि युद्धाय जयोऽस्तु नो भीः।
भो जागृतास्मि क्व धनुः क्व खड्गः
उत्तिष्ठतोत्तिष्ठत सुप्तसिंहाः।।

9. अधोलिखितेषु अलङ्कारं निर्दिशत।

(क) सहस्रसूर्या इव भासुरास्ते
समृद्धिमत्यां शुशुभुर्धरित्र्याम्।

(ख) भो भो अवन्त्यो मगधाश्च बङ्गाः
अङ्गाः कलिङ्गाः कुरुसिन्धवश्च।।

10. अधोलिखिते श्लोके प्रयुक्तस्य छन्दसः नाम लिखत।

ते ब्रह्मचर्येण विशुद्धवीर्याः
ज्ञानेन ते भीमतपोभिरार्याः।
सहस्रसूर्या इव भासुरास्ते
समृद्धिमत्यां शुशुभुर्धरित्र्याम्।।

योग्यताविस्तारः

(क) अधोलिखितानां सूक्तीनां सन्ततिप्रबोधनम् इति पाठेन भावसाम्यम् अनुसन्धाय तुलना कार्या।

(क) उत्तिष्ठत जाग्रत प्राप्य वरान्निबोधत।
(ख) माता भूमिः पुत्रोऽहं पृथिव्याः।
(ग) शूरस्य मरणं तृणम्।
(घ) अपि स्वर्णमयी लङ्का न मे लक्ष्मण रोचते।
जननी जन्मभूमिश्च स्वर्गादपि गरीयसी।।

(ख) महाभारते विदुरायाः सन्देशेन सन्ततिप्रबोधनस्य भावसाम्यं प्रतिपादयत।

अष्टमः पाठः

दयावीर कथा

11116CH08

प्रस्तुत पाठ मैथिली, संस्कृत और अपभ्रंश (अवहट्ठ) के प्रसिद्ध कवि विद्यापति द्वारा विरचित **'पुरुष-परीक्षा'** नामक कथाग्रन्थ से सङ्कलित किया गया है। विद्यापति का जन्म चतुर्दश शताब्दी (1360–1448) में मिथिला क्षेत्र के बिसफी ग्राम में हुआ था। 'विद्यापति-पदावली' इनकी लोकविश्रुत रचना है। इन्होंने संस्कृत में विविधविषयक 12 ग्रन्थों की रचना की है।

'पुरुष-परीक्षा' में सच्चे पुरुष की परख कैसे की जाये-यह बताने के लिए वासुकि नामक मुनि पारावार नामक राजा को अनेक कथाएँ सुनाते हैं। प्रस्तुत कथा में राजा हम्मीरदेव को दयावीर के रूप में चित्रित किया गया है। कथा के अनुसार राजा हम्मीरदेव ने सम्राट् अलाउद्दीन के कोप का भाजन बने शरणागत मुहम्मद शाह (सेनापति) की प्राणपण से रक्षा की है।

दयालुः पुरुषः श्रेष्ठः सर्वजन्तूपकारकः।
तस्य कीर्तनमात्रेण कल्याणमुपपद्यते॥

अस्ति कालिन्दीतीरे योगिनीपुरं नाम नगरम्। तत्र अलावदीनो नाम यवनराजो बभूव। स चैकदा केनापि निमित्तेन महिमासाहिनाम्ने सेनानिने अकुप्यत्। स च यवनस्वामिनं प्रकुपितं प्राणग्राहकं च ज्ञात्वा चिन्तयामास, सामर्षो राजा विश्वसनीयो न भवति। तदिदानीं यावदनिरुद्धोऽस्मि तावदेवेतः क्वापि गत्वा निजप्राणरक्षां करोमीति परामृश्य सपरिवारः पलायितः। पलायमानोऽप्यचिन्तयत् यत्सपरिवारस्य दूरगमनमशक्यम्। परिवारं परित्यज्य पलायनमपि नोचितम्। यतः

जीवितार्थं कुलं त्यक्त्वा योऽतिदूरं जनो व्रजेत्।
लोकान्तरगतस्येव किं तस्य जीवितेन वा॥

तदिहैव दयावीरं हम्मीरदेवं समाश्रित्य तिष्ठामीति परामृश्य स यवनो हम्मीरदेवमुपगम्याह देव! विनापराधं हन्तुमुद्यतस्य स्वामिनस्त्रासेनाहं तव शरणमागतोऽस्मि। यदि मां रक्षितुं शक्नोषि तदा विश्वासं देहि। नो चेदितोऽन्यत्र गच्छामि।



राजोवाच– यवन! मम शरणागतं मयि जीवति यमोऽपि त्वां पराभवितुं न शक्नोति, किं पुनर्यवनराजः? तदभयं तिष्ठ।

ततस्तस्य राज्ञो वचनेन स यवनसचिवस्तस्मिन् रणस्तम्भनाम्नि दुर्गे निःशङ्कमुवास। क्रमेण यवनराजस्तत्रावस्थितं तं विदित्वा परमसामर्षः करितुरगपदाति– पदाघातैर्धरित्रीं चालयन् दुर्गद्वारमागत्य हम्मीरदेवेन साकं युद्धं कृतवान्, परं जयं न लब्धवान्।

प्रथमयुद्धानन्तरं यवनराजेन हम्मीरदेवं प्रति दूतः प्रहितः। दूत उवाच– राजन् हम्मीर! श्रीमान् यवनराजस्त्वामादिशति यन्ममापथ्यकारिणं महिमासाहिं परित्यज्य देहि। यद्येनं न दास्यसि तदा श्वस्तने प्रभाते तव दुर्गं तुरगखुराघातैश्चूर्णावशेषं कृत्वा

महिमासाहिना सह त्वामन्तकपुरं नेष्यामि। हम्मीरदेव उवाच- रे दूत! त्वमवध्योऽसि। तवाहं किं करवाणि? अस्योत्तरं तव स्वामिने खड्गधाराभिरेव दास्यामि न वचोभिः। मम शरणागतं यमोऽपि विपक्षदृष्ट्या वीक्षितुं न शक्नोति किं पुनर्यवनराजः?

ततो निर्भर्त्सिते दूते गते सति यवनराजः कुपित्वा युद्धसमुद्धरो बभूव। एवमुभयोरपि बलयोर्युद्धेऽर्धावशिष्टसुभटे यवनसैन्ये दुर्गे ग्रहीतुमशक्ये यवनराजः परावृत्य निजनगरगमनाकाङ्क्षी बभूव। तञ्च भग्नोद्यमं दृष्ट्वा रायमल्लरामपालनामानौ हम्मीरदेवस्य द्वौ सचिवौ दुष्टौ यवनराजमागत्य मिलितौ। तावूचतुः यवनराज! भवता क्वापि न गन्तव्यम्। दुर्गे दुर्भिक्षमापतितम्। श्वः परश्वो वा दुर्गं ग्राहयिष्यावः। ततस्तौ दुष्टसचिवौ पुरस्कृत्य यवनराजेन दुर्गद्वाराण्यवरुद्धानि।

तथा सङ्कटं दृष्ट्वा हम्मीरदेवः स्वसैनिकान् प्रत्युवाच - रे रे योद्धारः! परिमितबलोऽप्यहं शरणागतकरुणया प्रवृद्धबलेनापि यवनराजेन समं योत्स्यामि। ततो यूयं सर्वे दुर्गाद्बहिः स्थानान्तरं गच्छत। त ऊचुः- भवान् निरपराधो राजा (शरणागतस्य) यवनस्य करुणया सङ्ग्रामे मरणमङ्गीकुरुते। वयं भवतो जीव्यभुजः कथमिदानीं भवन्तं स्वामिनं परित्यज्य कापुरुषपदवीमनुसरिष्यामः? किञ्च श्वस्तने प्रभाते देवस्य शत्रुं हत्वा प्रभोर्मनोरथं साधयिष्यामः। यवनस्त्वयं वराकः स्थानान्तरं प्रहीयताम्। तेन रक्षणीयरक्षा सम्भवति। यवन उवाच-देव! किमर्थं ममैकस्य विदेशिनो रक्षार्थं सपुत्रकलत्रं स्वकीयराज्यं विनाशयिष्यसि? ततो मां परित्यज्य देहि। राजोवाच- यवन! मैवं ब्रूहि। यतः

भौतिकेन शरीरेण नश्वरेण चिरस्थितम्।
लप्स्यमानं यशः को वा परिहर्तुं समीहते॥

किञ्च यदि मन्यसे तदा निर्भयस्थानं त्वां प्रापयामि। यवन उवाच-राजन् मैवं ब्रूहि। सर्वप्रथमं मयैव विपक्षशिरसि खड्गप्रहारः कर्तव्यः।

ततः प्रभाते युद्धे प्रवर्त्तमाने हम्मीरदेवः सत्वर-तुरगारूढो निजसुभटसार्थसहितः पराक्रमं कुर्वाणो दुर्गान्निःसृत्य खड्गधारा-

प्रहारैर्विपक्षबलवाजिनः पातयन् कुञ्जरान् घातयन्, कबन्धान् नर्तयन् रुधिरधाराप्रवाहेन मेदिनीमलङ्कृत्य शर-शल्लितसर्वाङ्गस्तुरगपृष्ठे त्यक्तप्राणः सम्मुखः सङ्ग्रामभूमौ निपपात सूर्यमण्डलभेदी अभवत्।

शब्दार्थाः टिप्पण्यश्च

सर्वजन्तूपकारकः – सर्वेषां जन्तूनाम् उपकारकः, ष. त., सभी प्राणियों का उपकार करने वाला।

चैकदा – च + एकदा = एक समय।

प्रकुपितम् – प्र + कुप् + क्त, अत्यन्त क्रोधित हुए।

चिन्तयामास – चिन्तित हुआ।

सामर्षः – क्रोधयुक्त।

अनिरुद्धः – नि + रुध् + क्त = निरुद्धः, न निरुद्धः = अनिरुद्धः, (नञ्) न पकड़ा गया।

तदिहैव – तत् + इह + एव, अतः यहीं।

समाश्रित्य – सम् + आ + श्रि + ल्यप्, आश्रय लेकर।

परामृश्य – परा + मृश् + ल्यप्, विचार करके।

उपगम्य – उप + गम् + ल्यप्, समीप जाकर।

करितुरगपदाघातैः – करिणः तुरगाश्च-करितुरगाः, तेषां पदानाम् आघातः तैः, हाथियों, घोड़ों एवं पैदल सेना के पैरों के आघात से।

धरित्रीम् – पृथ्वी को।

चालयन् – चल् + णिच् + शतृ, कँपाते हुए।

प्रहितः – प्र + हि + क्त, भेजा।

ममापथ्यकारिणम् – मेरे विरोधी का।

श्वस्तने – आने वाले कल में।

तुरगखुराघातैः – घोड़ों के खुरों के आघात (टाप) से।

चूर्णावशेषम् – चूर चूर मात्र शेष।

अन्तकपुरम् – यमलोक।

अवध्यः – मारने योग्य नहीं।

वीक्षितुम्	–	वि + ईक्ष् + तुमुन्, देखने के लिए।
निर्भर्त्सिते	–	निर् + भर्त्स् + क्त, फटकारे गए।
बभूव	–	भू + लिट् प्रथम पुरुष एकवचन (परोक्षभूत) हुआ।
बलयोः	–	दोनों सेनाओं के।
अर्धावशिष्टसुभटे	–	आधे बचे सैनिकों वाले।
परावृत्य	–	लौटकर।
भग्नोद्यमम्	–	विफल पराक्रम का।
तावूचतुः	–	तौ + ऊचतुः वच् + लिट् प्रथम पुरुष द्विवचन, उन दोनों ने कहा।
दुर्भिक्षम्	–	अकाल।
परश्वः	–	परसों (आने वाला)।
परिमितबलः	–	कम सेना वाला।
प्रवृद्धबलेन	–	बड़ी सेना वाले ने।
ऊचुः	–	वच् + लिट् उत्तमपुरुष बहुवचन, कहा।
जीव्यभुजः	–	जीविका का उपभोग करने वाले।
कापुरुषः	–	कायर (नीच) पुरुष।
वराकः	–	बेचारा, अभागा।
प्रहीयताम्	–	भेज दीजिए।
सपुत्रकलत्रम्	–	पुत्र और स्त्री के साथ।
लप्स्यमानम्	–	प्राप्त होने वाले।
समीहते	–	चाहता है।
विपक्षबलवाजिनः	–	शत्रुओं की सेना के घोड़ों को।
कुञ्जरान्	–	हाथियों को।
पातयन्	–	पत् + णिच् + शतृ, गिराते हुए।
कबन्धान् नर्तयन्	–	कं मुखं बध्नाति–कबन्धः, तान्, नृत् + णिच् + शतृ, कटे हुए शरीर के धड़ को नचाते हुए।
मेदिनीमलङ्कृत्य	–	पृथ्वी को शोभित (रंग) करके।
शरशल्लितसर्वाङ्गः	–	बाणों से खण्ड–खण्ड हुए सर्वाङ्ग शरीर वाले।
सूर्यमण्डलभेदी	–	सूर्यमण्डल का भेदन करने वाला अर्थात् वीरगति को प्राप्त।

अभ्यासः

1. संस्कृतभाषया उत्तरत।

(क) पुरुषपरीक्षायाः लेखकः कः?
(ख) अलावदीनो नाम यवनराजः कस्मै अकुप्यत्?
(ग) महिमासाहिसेनानी प्राणरक्षायै कुत्र अगच्छत्?
(घ) हम्मीरदेवः यवनसेनानिनं प्रति किमवदत्?
(ङ) हम्मीरदेवेन निर्भर्त्सिते दूते यवनराजः किमकरोत्?
(च) भग्नोद्यमं यवनराजं दृष्ट्वा तमागत्य कौ मिलितौ?
(छ) युद्धसङ्कटमवलोक्य हम्मीरदेवः स्वसैनिकान् प्रति किमकथयत्?
(ज) 'मां परित्यज्य देहि' इत्युक्तवति यवनसचिवे हम्मीरदेवः तं प्रति किमवदत्?
(झ) शरणागतरक्षायै कः वीरगतिमलभत?

2. अधोलिखितानां पदानां वर्तमानकाले प्रचलिताः संज्ञाः लिखतः।

अलावदीनः, रणस्तम्भदुर्गः, योगिनीपुरम्, यवनराजः।

3. आशयं स्पष्टीकुरुत।

(क) जीवितार्थं कुलं त्यक्त्वा योऽतिदूरं जनो व्रजेत्।
लोकान्तरगतस्येव किं तस्य जीवितेन वा।।
(ख) वयं भवतो जीव्यभुजः कथमिदानीं भवन्तं स्वामिनं
परित्यज्य कापुरुषपदवीमनुसरिष्यामः।

4. प्रकृतिप्रत्ययविभागः क्रियताम्।

ज्ञात्वा, दृष्ट्वा, हत्वा, परित्यज्य, पुरस्कृत्य, अलङ्कृत्य, घातयन्, पलायमानः।

5. प्रकृतिं प्रत्ययं च योजयित्वा पदरचनां कुरुत।

विद् + क्त्वा, परा + मृश् + ल्यप्, निर् + सृ + ल्यप्, पत् + णिच् + (इ) + शतृ, कृ + शानच्, रक्ष् + तुमुन्।

6. अधोलिखितशब्दान् आश्रित्य वाक्यरचनां कुरुत।

कुपित्वा, परामृश्य, अलङ्कृत्य, नर्तयन्, कुर्वाणः, गन्तव्यम्, पलायमानः, रक्षितुम्, लब्धवान्।

7. सन्धिविच्छेदः क्रियताम्।

सामर्षः, भग्नोद्यमम्, ममैकस्य, यमोऽपि, गतस्येव, मयैव, तुरगारूढः, इहैव, चूर्णाविशेषम्।

8. अधोलिखिताव्ययपदान्याधृत्य संस्कृते वाक्यरचनां कुरुत।

तत्र, यतः, इह, तदा, ततः, च, यदि, श्वः, परश्वः।

योग्यताविस्तारः

सत्याहिंसादयादयः सद्गुणाः सदाचारस्य स्वरूपं निर्धारयन्ति। साधुभिः सदैव दयादयः गुणाः परिपालिताः। दयासदृशमिह परत्र च न किञ्चिदपि वर्तते। अतः सर्वेषु भूतेषु दया कर्तव्या।

नात्मनोऽपि प्रियतरः पृथिवीमनुसृत्य ह।
तस्मात् प्राणिषु सर्वेषु दयावानात्मवान् भवेत्॥

(*महाभारतम्, अनु. 116-22*)

आर्तत्राणाय वः शस्त्रं न प्रहर्तुमनागसि।

(*अभिज्ञानशाकुन्तलम्-प्रथमाङ्क*)

आर्तानामिह जन्तूनामार्तिच्छेदं करोति यः।
शङ्खचक्रगदाहीनो द्विभुजः परमेश्वरः॥

11116CH09

नवमः पाठः

विज्ञाननौका

प्रस्तुत पाठ 1933 में पुरी (उड़ीसा) में जन्मे कवि प्रो. श्रीनिवास रथ द्वारा रचित कविता-संग्रह **तदेव गगनं सैव धरा** से संगृहीत है। श्रीनिवास रथ बाल्यकाल से मध्यप्रदेश के विभिन्न नगरों में रहे तथा अपने पिता से पारम्परिक पद्धति द्वारा संस्कृत का अध्ययन करने के पश्चात् उच्चशिक्षा इन्होंने काशी हिन्दू विश्वविद्यालय में प्राप्त की। ये विक्रम विश्वविद्यालय उज्जैन में संस्कृत विभाग में प्राध्यापक एवं विभागाध्यक्ष रहे।

प्रायः 40 वर्षों से ये संस्कृत में गीत लिखते आ रहे हैं। इनके गीतों का उपर्युक्त संग्रह हिन्दी अनुवाद के साथ प्रकाशित हो चुका है।


प्रस्तुत पाठ में आधुनिक विश्व में यान्त्रिकता और कृत्रिमता के प्रति बढ़ते हुए मोह के प्रति सचेत किया जा रहा है कि जीवन मूल्यों को भुलाकर नई भौतिक तकनीकी से मानव को अभिभूत नहीं होना चाहिए।

विज्ञाननौका समानीयते
ज्ञानगङ्गा विलुप्तेति नालोक्यते॥

संस्कृतोद्यानदूर्वा दरिद्रीकृता
निष्कुटेषु स्वयं कण्टकिन्याहिता।
पुष्पितानां लतानां न रक्षा कृता
विस्तृता वाटिकायोजना निर्मिता॥

के कथं कुत्र वा क्रन्दनं कुर्वते
राजनीतिश्मशानेषु न ज्ञायते। विज्ञाननौका.....

वर्तमानस्थितिर्मानवानां कृते
प्रत्यहं दुर्निमित्तैव संलक्ष्यते।
यत्र कुत्रापि शान्तिः समुद्वीक्ष्यते
तत्र विध्वंसबीजं समायोज्यते॥



सर्वनाशार्थविद्यैव विद्योतते
स्वार्थरक्षावलम्बोऽपि नो चिन्त्यते। विज्ञाननौका.....

तारकायुद्धसम्भावनाऽधीयते
गोपनीयायुधानां कथा श्रूयते।
विश्वशान्तिप्रयत्नेषु सन्दृश्यते
विश्वसंहारनीतिर्यथोपास्यते॥

भूतले जीवरक्षा परिक्षीयते
जीवनाशाऽन्तरिक्षेऽनुसन्धीयते। विज्ञाननौका.....

विश्वबन्धुत्वदीक्षागुरूणां व्रतं
धर्मसंस्कारतत्त्वं बतास्तं गतम्।
लोककल्याणशिक्षासमाराधनं
हन्त! विक्रीयते काव्य-सङ्कीर्तनम्॥

यन्त्रमुग्धान्धताऽहर्निशं सेव्यते
संस्कृतिज्ञानरक्षा न सञ्चिन्त्यते। विज्ञाननौका.....

शब्दार्थाः टिप्पण्यश्च

समानीयते – सम् + आ + नी कर्मवाच्य, लट् प्र. पु. ए.व., लाई जा रही है।

विलुप्ता – वि + लुप् + क्त + टाप् स्त्री., लुप्त हो गई है।

आलोक्यते – आ + लोक् कर्मवाच्य, दिखाई दे रही है।

दूर्वा – दूब, घास।

दरिद्रीकृता – अदरिद्रा दरिद्रा कृता, दरिद्र + च्वि + कृ + क्त स्त्री. प्र. पु. ए.व., गरीब बना दी गई।

निष्कुटेषु – घरेलू उद्यानों में, क्रीडोद्यान।

कण्टकिनी – केक्टस (नागफनी)

आहिता – आ + धा + क्त, स्त्री., लगाई।

वाटिकायोजना – वाटिकानां योजना, बगीचियों का निर्माण।

निर्मिता – निर् + मा + क्त, स्त्री. प्र.पु. ए.व., निर्माण किया गया, बनाई गई।

प्रत्यहं – अहनि अहनि, अव्ययीभाव समास, प्रतिदिन।

दुर्निमित्ता – दुष्टं निमित्तं यस्याः सा, (बहुव्रीहिः), अमांगलिक।

संलक्ष्यते – सम् + लक्ष्य् + कर्मवाच्य, लट्लकार, प्र.पु. ए.व., दिखाई दे रही है।

समुद्वीक्ष्यते – सम् + उत् + वि + ईक्ष् कर्मवाच्य, लट्लकार, प्र.पु., दिखाई दे रही है।

विध्वंसबीजम् – विध्वंसस्य बीजं, ष. तत्पुरुष, विनाश का बीज।

समायोज्यते	–	सम् + आ + युज् + णिच् + कर्मवाच्य लट्, प्र.पु., ए.व. बोया जा रहा है।
सर्वनाशार्थविद्या	–	सर्वनाश + अर्थविद्या सभी पदार्थों का विनाश करने वाली विद्या।
विद्योतते	–	वि. उपसर्ग, द्युत् धातु, लट् लकार प्र.पु. ए.व., चमक रही है, दिखाई दे रही है।
स्वार्थरक्षावलम्बोऽपि	–	स्वार्थरक्षा + अवलम्बः + अपि, स्वार्थस्य रक्षायाः अवलम्बः, ष. तत्पु., स्वार्थरक्षा का आश्रय भी।
तारकायुद्धसम्भावना	–	तारकाणां युद्धस्य सम्भावना, (स्टार वार)।
आधीयते	–	आ + धा + कर्मवाच्य, लट्, प्र.पु. ए.व. , सिखाई जा रही है, की जा रही है।
गोपनीयायुधानां	–	गोपनीय आणविक अस्त्र-शस्त्र आदि।
विश्वसंहारनीतिर्यथोपास्यते	–	विश्वसंहारनीतिः + यथा + उपास्यते, जैसे विश्व के विनाश की नीति सिखाई जा रही है।
उपास्यते	–	उप + आस् कर्मवाच्य लट् प्र.पु., उपासना की जा रही है।
परिक्षीयते	–	परि + क्षि + कर्मवाच्य, लट्, प्र.पु. ए.व. क्षीण हो रही है।
जीवनाशाऽन्तरिक्षेऽनुसन्धीयते	–	जीवन + आशा + अन्तरिक्षे + अनुसन्धीयते, जीवन की आशा आकाश में ढूँढ़ी जा रही है।
अनुसन्धीयते	–	अनु + सम् + धा, कर्मवाच्य, लट्, प्र.पु. ए.व., अनुसन्धान किया जा रहा है।
बतास्तङ्गतम्	–	बत + अस्तं गतम्, खेद है कि नष्ट हो गई।
विक्रीयते	–	वि + क्री + कर्मवाच्य, लट्, प्र.पु. ए.व., बेचा जा रहा है।
यन्त्रमुग्धान्धता	–	यन्त्रों के मोह का अन्धकार।
अहर्निशं	–	अहः च निशा च, द्वन्द्व समास, दिन रात।
सञ्चिन्त्यते	–	सम् + चिन्त् + कर्मवाच्य, लट् प्र.पु., ए.व., सोचा जा रहा है।

अभ्यासः

1. संस्कृतेन उत्तरं दीयताम्।

(क) एषा गीतिका कस्मात् पुस्तकात् सङ्गृहीता?
(ख) अस्याः गीतिकायाः लेखकः कः?
(ग) अत्र का दरिद्रीकृता?
(घ) निष्कुटेषु का आहिता?
(ङ) वाटिकायोजनायां केषां कासां च रक्षा न कृता?
(च) राजनीति-श्मशानेषु किं न ज्ञायते?
(छ) मानवानां कृते वर्त्तमानस्थितिः कीदृशी सल्लक्ष्यते।
(ज) आधुनिकयुगे कस्याः अवलम्बः न चिन्त्यते?
(झ) विश्वशान्तिप्रयत्नेषु का उपास्यते?
(ञ) जनैः अहर्निशं का सेव्यते?

2. रिक्तस्थानानि पूरयत।

(क) ज्ञानगङ्गा .... नालोक्यते?
(ख) के कथं कुत्र वा .... कुर्वते?
(ग) यत्र कुत्रापि .... समुद्वीक्ष्यते।
(घ) गोपनीयायुधानां .... श्रूयते।
(ङ) भूतले .... परिक्षीयते।

3. **'संस्कृतोद्यानदूर्वा .... निर्मिता'** अस्य श्लोकस्य आशयः हिन्दीभाषया स्पष्टीक्रियताम्।

4. अधोलिखितपदानां संस्कृतवाक्येषु प्रयोगं कुरुत।

ज्ञानगङ्गा, ज्ञायते, शान्तिः, विद्योतते, सन्दृश्यते जीवरक्षा, विक्रीयते।

5. **'वर्तमान .... समायोज्यते'** अस्य श्लोकस्य अन्वयं कुरुत।

6. अधोलिखितपदेषु सन्धिं सन्धिच्छेदं वा कुरुत।

विलुप्तेति, कण्टकिनी + आहिता, प्रत्यहं, बत + अस्तं, अन्तरिक्षे + अनुसन्ध ीयते, यथोपास्यते।

योग्यताविस्तारः

(क) विज्ञानं न केवलं सुखकरम् अस्ति अपितु दुःखस्य मूलम् अपि अस्ति। यथा श्रीरथमहोदयः कथयति-यानि उपकरणानि अन्तरिक्षमण्डले प्रक्षेपितानि

सन्ति, तेषु केचित् उपग्रहाः तु सन्देशवहनाय उपयुक्ताः भवन्ति परं अन्ये अनेके उपग्रहाः धूमकेतव इव खगोलकक्षासु भ्रमन्तः तिष्ठन्ति। लक्षाधिकाः कन्दुकाकाराः अवकरसमूहाः विविधेषु वलयेषु पृथ्वीं परितः भ्रमन्ति। क्वचित् क्रमशः कक्षान्तरं साधयित्वा गुरुत्वाकर्षणवशात् तादृशः अवकरः धूलिकणरूपेण भूमौ आपतति।

(ख) प्राचीनभारते विज्ञानम्–

प्राचीनकाले समयस्य सूक्ष्मातिसूक्ष्मं स्वरूपं ज्ञातुं यन्त्राणां सहायता गृह्यते स्म। एतस्य कृते वेधशालानां निर्माणं क्रियते स्म। तत्कालीनानां यन्त्राणां उल्लेखः शास्त्रेषु उपलभ्यते। यथा–

दिनगतकालावयवा ज्ञातुमशक्या यतो विना यन्त्रैः।
वक्ष्ये यन्त्राणि ततः स्फुटानि सङ्क्षेपतः कतिचित्।
गोलो नाडीवलयं यष्टिः शङ्कुर्घटी चक्रम्।
चापं तुर्यं फलकं धीरेकं पारमार्थिकं यन्त्रम्।।

सूर्यसिद्धान्तादिशास्त्रेषु भूगोल-खगोलविषयकं ज्ञानम् उपलभ्यते। यथा–

भगवन्! किम्प्रमाणा भूः किमाकारा किमाश्रया।
किं विभागा कथं चात्र सप्तपातालभूमयः।।

अहोरात्रव्यवस्थां च विदधाति कथं रविः।
कथं पर्येति वसुधां भुवनानि विभावयन्।।

कथं पर्येति वसुधां भुवनानि विभावयन्।
भूमेरुपर्युपर्यूर्ध्वाः किमुत्सेधाः किमन्तराः।।

न्यायवैशेषिकशास्त्रेषु अपि सप्तमौलिकपदार्थानाम् उल्लेखः पूर्वतः एव उपलभ्यते। तत्र द्रव्य-गुण-कर्म-सामान्य-विशेष- समवाय-अभावादीनां भेदप्रभेदादिक्रमः सविस्तरं वर्तते।

(ग) प्रो. श्रीनिवासरथविरचितस्य अस्य गीतस्य तथैव अधोलिखितस्य अन्यस्य गीतस्यापि अभ्यासः श्रव्य-साधनैः कर्तुं शक्यते–

जीवनगतिरनुदिनमपरा
तदेव गगनं सैव धरा।।

पापपुण्यविधुरा धरणीयं
कर्मफलं भवताऽऽदरणीयम्।
नैतद्वचोऽधुना रमणीयम्
तथापि सदसद् विवेचनीयम्।।

11116CH10

दशमः पाठः

कन्थामाणिक्यम्

प्रस्तुत पाठ आधुनिककाल के प्रतिष्ठित संस्कृत साहित्यकार अभिराज राजेन्द्रमिश्र के एकांकी-संग्रह रूपरुद्रीयम् से संकलित है।

'कन्थामाणिक्यम्' का अर्थ है- गुदड़ी का लाल! नगर के जाने-माने हाईकोर्ट के वकील भवानीदत्त को स्वभावतः चिढ़ है गरीबों की बस्ती से। वह नहीं चाहते कि उनका बच्चा सिन्धु गन्दी बस्ती की ओर जाये, परन्तु संयोगवश सिन्धु का मित्र सोमधर उसी बस्ती में रहता है।

दुर्घटना में सिन्धु के आहत होने पर एक दिन वही सोमधर सिन्धु को रिक्शे पर बैठाकर घर लाता है। इधर सिन्धु के घर सब चिन्तित हैं कि बच्चा अभी तक घर क्यों नहीं लौटा? फ़ोन पर फ़ोन होते हैं। भवानीदत्त स्वयं पता लगाने जाना ही चाहते हैं कि एक रिक्शा घर के लॉन में आता है जिस पर सोमधर सिन्धु को गोद में सँभाले बैठा दीखता है।

सोमधर के इस सद्व्यवहार से भवानीदत्त की आँखें खुल जाती हैं। वह उसे गुदड़ी का लाल मान लेते हैं और उसकी शिक्षा का सारा भार अपने ऊपर ले लेते हैं। अब उन्हें गरीबों एवं उनकी बस्ती से बड़ी सहानुभूति हो जाती है।

(*समुत्प्रेरकं शिशुजनैकाङ्कम्*)

॥ प्रथमं दृश्यम् ॥

नगरस्य सघनवसतौ प्रख्याताधिवक्तुर्भवानीदत्तस्य भवनम्। भवनान्तरे परिजनानां वार्ताध्वनिः श्रूयते।

भवानीदत्तः - रामदत्त! अयि भो रामदत्त! हरण!

(*सेवकौ रामदत्तहरणौ ससम्भ्रमं धावन्तावागच्छतः*)

हरणः – (*अङ्गप्रच्छदेन हस्तौ मार्जयन्*)
अन्नदातः! रसवत्यामासम्। किं कर्तुं युज्यते?

रामदत्तः – (*वचोभिः प्रसादयन्*)
स्वामिन्! शीतलमानयानि किञ्चित् उष्णं वा? आहोस्वित् पक्ववटिकादीनि खादितुमिच्छति भवान्?

भवानीदत्तः – (*रोषोत्तप्तां मुखाकृतिं किञ्चिन्मसृणयन्*)
अलम् अलम्। सर्वेऽपि यूयं म्रियध्वे? आहूतोऽपि न शृणोति कश्चित्? गृहमस्ति कस्यचित् भद्रपुरुषस्य भग्नावशेषो वा प्रेतानाम्?

रामदत्तः – (*सापराधमुद्रम्*)
स्! स् स्वामिन् कार्यव्यापृतैरस्माभिर्न श्रुतम्। तत्क्षमन्तामन्नदातारः।

भवानीदत्तः – **भवतु। अलं नाटकेन। गच्छ, सिन्धुमानय तावत्। निषेधं नाटयेच्चेत् कर्णग्राहमानय।**

हरणः – (*भयभीतस्सन्*)
स्वामिन्! किं भर्तृदारकेण किञ्चिदपराद्धम्? इदानी- मेव क्रीडित्वा सोऽपि समागतः। स्वामिन्याः पार्श्वे भविष्यति।

भवानीदत्तः – (*कठोरस्वरेण*)
हरण! कियद्वारं निर्दिष्टोऽसि यत् प्रवचनं न कार्यम्। यदुच्यते तदेव शृणु! किमवगतम्?

हरणः – (*सनैराश्यम्*)
युक्तमेतत् स्वामिन्! एष गच्छामि।
(*हरणो गच्छति। रामदत्तोऽपि तमनुसरति। कति- पयनिमेषानन्तरं द्वावपि भृत्यौ भवानीदत्तस्य पुस्तकाल- यमागच्छतः। पश्चाच्चाधिवक्तुः पत्नी रत्नापि दारकेण सार्धमायाति*)

रत्ना – **किं वृत्तम्? अद्यागतप्राय एव वात्याचक्रमुत्थापयसि? कस्मिंश्चिद् वादे पराजितोऽसि किम्?**

भवानीदत्तः – **बाढम्। गृहेश्वरि! पराजितोऽस्मि तव न्यायालये।**
(हरणरामदत्तौ मुखे करप्रोञ्छनीं विन्यस्याऽट्टहासं रोद्धुं प्रयतेते)

भवानीदत्तः – *(सेवकौ प्रति)*
भो युवां तत्र किमुपजपथः? पलायेथां ततः।
(भृत्यौ हसन्तौ गृहाभ्यन्तरं पलायेते)

रत्ना – *(सस्मितम्)*
अवितथं भण, किं वृत्तम्? मनःस्थितिः कथमद्य संस्खलति?

भवानीदत्तः – *(प्रक्षालनद्रोण्यां मुखं प्रक्षाल्य, प्रच्छदेन च हस्तं मुखं मार्जयन्)*
भणामि, भणामि। सिन्धो! इतस्तावत्।

सिन्धुः – *(सभयं कातरदृष्ट्या जननीं पश्यन्)*
अम्ब!

भवानीदत्तः – *(कठोरदृष्ट्या पश्यन्)*
सिन्धो! इतस्तावत् । तात आह्वयति नाम्ना। आगच्छ।

रत्ना – *(दारकं लालयन्ती सविस्मयम्)*
भो! किं कृतवान् सिन्धुः। कथमेवं व्यवहरसि, समागच्छन्नेव अग्निं वर्षयसि? अहमपि तावदा-कर्णयानि।

भवानीदत्तः – **देवि! तदेव वच्मि यत्तव सिन्धुना समाचरितम्। कथं भोः, असभ्यानां वसतौ किमर्थं गतवानसि?**

सिन्धुः – *(सभयम्)* **तात! मम सखा सोमधरस्तत्र निवसति। ततः स्वपुस्तकं ग्रहीतुं गतोऽस्मि।**

भवानीदत्तः – **किं करोति तस्य पिता?**

सिन्धुः – **तस्य पिता चतुश्चक्रे शकटे निधाय शाकान् फलानि च विक्रीणीते।**

भवानीदत्तः – **तव पिता च किं करोति?**

सिन्धुः – **स तु उच्चन्यायालयेऽधिवक्ताऽस्ति।**

भवानीदत्तः - **कीदृशं तव भवनम्?**

सिन्धुः - **अतिसुन्दरं विशालं मार्जितं च मम भवनम् ।**

भवानीदत्तः - **सोमधरस्य च कीदृशम्?**

सिन्धुः - (*हतप्रभः सन्?*)
तस्य गृहं नातिदीर्घम्। अस्वच्छवीथिकायाञ्च स्थितम्। न मार्जितं न चाप्यलंकृतम्।

भवानीदत्तः - (*सक्रोधम्*)
मूर्ख! तस्य गृहमपि नातिदीर्घम्। अस्वच्छवीथिकायां स्थितम्। तस्य पिताऽपि शाकफलविक्रेता, न तव तात इव शिक्षितः। एवम्भूतेऽपि किमर्थं तत्राऽगमस्त्वम्?

सिन्धुः - (*सदैन्यम्*)
तात! सोमधरः मम सुहृदस्ति। स पठनेऽपि तीक्ष्णः। मय्यतितरां स्निह्यत्यसौ। तस्मादावयोः प्रगाढा मित्रता। स गणिते मम साहाय्यं करोति।

भवानीदत्तः - **भोः! पृच्छाम्यहं यत्तेन सह त्वया सख्यमेव कस्मात्कृतम्। तस्मै स्वपुस्तकं कस्माद् दत्तम्? किमुच्चकुलोत्प- न्नाश्छात्राः कक्षायां न सन्ति?**

सिन्धुः - (*निरुत्तरस्सन्*)
तात! सोमधरो मयि स्निह्यति। स मह्यमपि रोचते। अन्ये छात्रास्तु दुष्टाः। ममाध्यापिका सोमध रं कक्षायाः मान्यतरं (*मानीटर*) **कृतवती।**

भवानीदत्तः - (*सोद्वेगम्*)
त्वं कथं न मान्यतरः कृतः? फलशाकविक्रेतुर्दारकः कथं त्वामतिशेते?
(*सिन्धोः कर्णं किञ्चित्कुब्जीकुर्वन्*)
पश्य, इतोऽग्रे तस्यामसभ्यवसतौ न गमिष्यसि। अतः परं शिक्षको भवन्तं गणितमध्यापयिष्यति। अवगतं न वा? सोमधरेण साकं मैत्रीवर्धनस्य न काप्याव-श्यकता।
(*सिन्धुरस्फुटं रुदन् गृहाभ्यन्तरं प्रविशति*)

रत्ना – (*सरोषम्*)

साधु साधु! विलक्षणं पितृहृदयमवाप्तम्। कोमलहृदयं बालकं विद्वेषभावं शिक्षयति भवान्? अये, यो गुणवान् स एव सभ्यः स एव धनिकः, स एव आदरणीयः। तस्य गुणवतः पिता यदि शाकफलानि विक्रीय कुटुम्बं पालयति, तर्हि किमत्र पापम्? स्व-सङ्कीर्णदृष्टिमपलपितुं वराकस्य दारकस्य कर्णमेव भञ्जयितुं प्रवृत्तोऽसि।
(*दुर्मनायमाना गृहाभ्यन्तरं प्रविशति*)

॥ जवनिकापातः॥

॥ द्वितीयं दृश्यम्॥

सन्ध्याकालस्य चतुर्वादनवेला अधिवक्ता भवानी-दत्तः स्वपुस्तकालये निषण्णो दूरभाषयन्त्रं बहुशः प्रवर्तयति। भार्या रत्नापि पार्श्वस्थामासन्दीमुपविश्य चिन्तां नाटयति।

भवानीदत्तः – (*यन्त्रमुपयोजयन्*)

भोः! किमिदं भरद्वाजविद्यानिकेतनम्? का नु खलु भवती ब्रवीति? (*श्रुतिं नाटयन्*) **प्राचार्या? शोभनं शोभनम्। अयमहं भवानीदत्तो ब्रवीमि। नमस्करोमि तावत्। श्रूयतां तावत्। चतुर्वादनं जातम्। परन्तु मम दारकस्सिन्धुः इदानीं यावद् गृहं नोपावृत्तः। किं विद्यालयेऽद्य कश्चिन्महोत्सवो वर्तते?**
(*श्रुतिमभिनीय*) **किमुक्तम्? सपादत्रिवादन एवावकाशो जातः। सर्वेऽपि छात्राः गताः! बाढम्। पश्यामि।**

रत्ना – (*ससम्भ्रमम्!*)

किमुक्तवती प्राचार्या? त्रिवादनेऽवकाशो जातः? भो मम हृदयं कम्पते। सिन्धुः क्व वर्तते? भवान् त्वरितमेव स्कूटरयानेन गच्छतु। पश्यतु तावन्मध्येमार्गं विद्यालय- वाहनं क्व वर्तते? हे परमेश्वर! रक्ष मम दारकम्!

(*इति रोदिति*)

भवानीदत्तः – (*सान्त्वयन्*)
गच्छामि, गच्छामि। त्वं पुनः शिशुरिव धैर्यहीना जायसे। कस्मान्मनसि अमङ्गलमेव चिन्तयसि?

रत्ना – **भवान्न जानाति राजपथवृत्तम्। मद्यपा वाहनचालका झञ्झावेगेन यानं चालयन्ति। कोऽपि म्रियेत वा जीवे द्वा। तेषां हतकानां किं जायते? एतत्सर्वं स्मारं स्मारं निमज्जतीव मम हृदयम्।**

भवानीदत्तः – **भवतु। शान्ता भव। त्वरितमागच्छामि।**
(*इति प्रस्थामुपक्रमते। अकस्मादेव रिक्शायानमेकं भवनप्राङ्गणं प्रविशति। कश्चिद्बालकः सिन्धुमङ्के निधाय रिक्शायाने तिष्ठन्नास्ते*)

भवानीदत्तः – (*सत्वरमुपसृत्य*)
अये किमिदम्?
(सिन्धुं विलोक्य)
वत्स! सोमधरस्त्वमेवासि?

सोमधरः – (*सविनयम्*)
पितृव्य! अहमेवास्मि सोमधरः सिन्धोर्मित्रम्। सिन्धो-र्विद्यालयवाहनमद्य वेऽनचित् ट्रकयानेन दृढमाहतम्। ट्रकचालकस्त्वपक्रान्तः। सर्वेऽपि बालकाः क्षतविक्षता जाताः।

भवानीदत्तः – **वत्स! त्वं पुनः कुत्राऽसीः?**

सोमधरः – **पितृव्य! अहं पुनः प्रतिदिनमिव अद्यापि पदा-तिरेवागच्छन्नासम्। दुर्घटनामनु पञ्चनिमेषानन्तरमेव तत्रासादितवान्। महान् जनसम्मर्दस्तत्राऽसीत्। सिन्धुं प्रत्यभिज्ञाय, अहं पुनस्तद् रिक्शायानमधिरोप्य त्वरितं प्रचलितः। पितृव्य! नात्याहितं किमपि। सिन्धुः केवलं मूर्च्छामुपगतः।**
(*वार्तालापं श्रुत्वा भृत्यौ रत्ना च बहिरायान्ति। रत्ना सिन्धुं निस्संज्ञं दृष्ट्वा भृशं रोदिति*)

सोमधरः – **अम्ब! अलं चेतनां खलीकृत्य। डॉक्टरधूलियामहोदय-मानयामीदानीमेव। प्रतिवेश एव निवसत्यसौ।**

भवानीदत्तः – **वत्स सोमधर! मा गाः कुत्रापि त्वम्। मातृसमीपमेव तिष्ठ। अहं दूरभाषयन्त्रेणैव भिषजमाह्वयामि।**
(मध्य एव सिन्धुश्चेतनामनुभवति। सोऽम्बामाह्वयति)

सोमधरः – *(सहर्षम्)*
पितृव्यचरण! अलं भिषगाह्वानेन। सिन्धुश्चैतन्यमागतः।
(भवानीदत्तः दारकसमीपं गच्छति। रत्नानेत्रे आनन्दाश्रुपूरिते जायेते)

सिन्धुः – *(अम्बां तातं सोमधरञ्च दृष्ट्वा)*
अम्ब! कथमहं गृहमागतः? मम वाहनन्तु ट्रकयानेन दृढमाहतमासीत्। वयं सर्वेऽपि तारस्वरेणाक्रोशाम। वाहनमस्माकं विपर्यस्तमासीत्।

रत्ना – *(दारकं प्रचुम्बन्ती)*
एवमेतत् वत्स! विपर्यस्तं तव वाहनम्। सोमधर-स्त्वामानीतवान् रिक्शायानेन।

सिन्धुः – *(सप्रणयम्)*
सोमू?
(अकस्मादेव पितरमुपस्थितं दृष्ट्वा सिन्धुः शिथिलीभवति। भवानीदत्तोऽग्रेसरीभूय सोमधरशीर्षे करतलं सारयति। सिन्धुदृष्टिर्दीप्तिमुपगच्छति)

सोमधरः – *(सस्नेहम्)*
सिन्धो! अलं भयेन। सर्वथानाहतोऽसि प्रभुकृपया। श्व आवां पुनर्विद्यालयं गमिष्यावः। भवतु, पितृव्य! गच्छामि इदानीम्। नमस्ते। अम्ब! नमस्ते!!

भवानीदत्तः – *(समादिशन्निव)*
वत्स सोमधर! मित्रगृहान्नैवं गन्तव्यम्। तिष्ठ तावत्। वयं सर्वेऽपि सहैवाल्पाहारं निर्वर्तयिष्यामः। सपीत्य- नन्तरं गच्छसि।

सोमधरः – **पितृव्यचरण! स्वपितुः शाकशकट्याः सज्जा मयैव करणीया वर्तते। स मां प्रतीक्षमाणो भविष्यति।**

भवानीदत्तः – (*हतप्रभः सन्*)
वत्स सोमधर! सत्यमेवासि त्वं कन्थामाणिक्यम्। सिन्धुस्त्वामतितरां प्रशंसति। इतः प्रभृति तव शिक्षण–व्यवस्थामहं सम्पादयिष्यामि।
(*भृत्यौ अल्पाहारमानयतः। सर्वेऽपि निषीदन्त्यशितुम्*)
बाढम्। सोमधर! श्व एवाहं युवयोः कृते द्विचक्रिके क्रेष्यामि। युवां द्वावपि सावधानं प्रवर्तयतम्। सहैवा– गच्छतं सहैव गच्छतम्। वत्स! शुल्कमपि ददासि?

सोमधरः – **न खलु। शुल्कस्तु मुक्तः। निर्धनच्छात्रनिधितः पञ्च– विंशतिरूप्यकाणि प्रतिमासं प्राप्यन्ते।**

भवानीदत्तः – **शोभनम्। वत्स! तथापि यदि धनमपेक्ष्यते तर्हि मां भणिष्यसि।** (*रत्ना पतिं सगर्वं पश्यति*)

सोमधरः – (*चायपेयं परिसमाप्य समुत्तिष्ठन्*)
पितृव्यचरण! गच्छामि तावत्। नमस्ते।
(*रत्नां प्रति*)
अम्ब! प्रणमामि।
(*सिन्धुं लालयन्*)
मित्र सिन्धो! श्वो मिलिष्यावः।

भवानीदत्तः – (*सहर्षं रत्नां प्रति*)
रत्ने! उद्घाटितं त्वयाऽद्य मम नेत्रयुगलम्। सत्यमेव सम्प्रति सिन्ध्वभिरुचिं प्रशंसामि। सोमधरस्तु कन्था– माणिक्यमेव वर्तते। इदानीमनुभूतम्मया यद्गुणवन्त एव सभ्याः धनिकाः सम्माननीयाश्च। न मे द्वेषस्सम्प्रति ग्राम्यवसतिं प्रति। पङ्केऽपि कमलं विकसति। रत्ने! अद्यप्रभृत्यहं त्वन्नेत्राभ्यां संसारं द्रक्ष्यामि।

॥ शनैर्जवनिका पतति ॥

शब्दार्थाः टिप्पण्यश्च

रसवत्याम्	–	पाकशालयाम् (रसवती स.ए.व.), रसोईघर में।
प्रसादयन्	–	मोदयन् (प्र + सद् + शतृ), प्रसन्न करते हुए।
आहोस्वित्	–	अथवा (अव्यय), या।
पक्ववटिका	–	खाद्यपदार्थविशेषः, पकौड़ी।
मसृणयन्	–	मसृणं कुर्वन् (मसृणपदेन नामधातुप्रयोगः), कोमल बनाते हुए।
भग्नावशेषः	–	भग्नभवनम्, खंडहर।
कार्यव्यापृतैः	–	कार्येषु व्यापृतैः, कार्य में लगे (व्यस्त) होने से।
सनैराश्यम्	–	नैराश्येन सहितम्, निराशा से युक्त (होकर)।
दारकेण सार्धम्	–	पुत्रेण सहितम्, पुत्र के साथ।
वात्याचक्रम्	–	झञ्झावातः, तूफ़ान।
करप्रोञ्छनीम्	–	हस्तप्रोञ्छनीम्, तौलिया को (हाथ पोंछने के वस्त्र को)।
उपजपथः	–	वार्तालापं कुरुथः, कानाफूसी कर रहे हो।
अवितथं भण	–	सत्यं वद; सच बताओ।
प्रक्षालनद्रोण्याम्	–	मुखप्रक्षालनपात्रे; प्रक्षालनाय द्रोणी तस्याम्, मुँह धोने के लिए पात्र परात, तसला आदि।
वच्मि	–	वदामि, बोलता हूँ।
निषण्णः	–	उपविष्टः (नि + सद् + क्त), बैठा हुआ।
आसन्दीम्	–	आसन्दिकायाम्, कुर्सी पर।
उपावृत्तः	–	प्रत्यागतः (उप + वृञ् + क्त), लौटा है।
प्रत्यभिज्ञाय	–	ज्ञात्वा अवबुद्ध्य, पहचानकर।
प्रतिवेशे	–	समीपस्थे गृहे, पड़ोस में।
भिषजम्	–	वैद्यम् (बिभेति अस्मात् रोगः भी + षुक् ह्रस्वश्च), वैद्य को।
विपर्यस्तम्	–	व्युत्क्रान्तम् दुर्घटितम् (वि + परि + अस् + क्त), उलट गया।
कन्थामाणिक्यम्	–	जीर्णवस्त्रेषु रत्नम्, गुदड़ी का लाल।

अभ्यासः

1. संस्कृतेन उत्तरं दीयताम्।

(क) रामदत्तः वचोभिः प्रसादयन् स्वामिनं किं पृच्छति?
(ख) भवानीदत्तस्य स्वभावः कीदृशः वर्णितः?
(ग) भवानीदत्तस्य पत्न्याः नाम किम् अस्ति?
(घ) सोमधरस्य गृहं कीदृशम् आसीत्?
(ङ) कयोः मध्ये प्रगाढा मित्रता आसीत्?
(च) कस्य विलम्बेन आगमने रत्ना चिन्तिता?
(छ) रत्ना राजपथविषये किं कथयति?
(ज) कः प्रतिदिनं पदातिः गमनागमनं करोति स्म?
(झ) कः वैद्यं दूरभाषेण आह्वयति?
(ञ) सोमधरः कथं धनहीनोऽपि सम्माननीयः?

2. हिन्दीभाषया आशयं व्याख्यां वा लिखत।

(क) किं वृत्तम्? अद्यागतप्राय एव वात्याचक्रम् उत्थापयसि? रत्नायाः अनेन वाक्येन भवानीदत्तस्य चरित्रं उद्घाटितं भवति।
(ख) पश्य, इतोऽग्रे तस्यामसभ्यवसतौ न गमिष्यसि।
(ग) भवान् न जानाति राजपथवृत्तम्।
(घ) सिन्धो ! अलं भयेन। सर्वथानाहतोऽसि प्रभुकृपया।

3. अस्य पाठस्य शीर्षकस्य उद्देश्यं सङ्क्षेपेण एकस्मिन् अनुच्छेदे हिन्दीभाषया लिखत।

4. अधोलिखितेषु विशेष्यपदेषु विशेषणपदानि पाठात् चित्वा योजयत।

(क) .... मुखाकृतिम्।
(ख) .... अस्माभिः।
(ग) .... भृत्यौ।
(घ) .... मित्रता।
(ङ) .... दारकस्य।
(च) .... बालकाः।

5. अधोलिखितपदानां वाक्येषु प्रयोगं कुरुत।

मार्जयन्, आनय, पार्श्वे, दारकेण, प्रक्षालयति, सविस्मयम्, वच्मि, शकटे, स्निह्यति, आसन्दी।

6. अधोलिखितानां पदानां सन्धिं सन्धिविच्छेदं च कुरुत।

(क) भग्नावशेषः = ...
(ख) द्वौ + अपि = ...
(ग) पश्चाच्च = ...
(घ) पराजितः + असि = ...
(ङ) चाप्यलङ्कृतम् = ...
(च) कः + चित् = ...

7. पाठमाश्रित्य रत्नायाः सोमधरस्य च चारित्रिकवैशिष्ट्यम् सोदाहरणं हिन्दीभाषया लिखत।

8. कोष्ठाङ्कितेषु पदेषु उपयुक्तपदं चित्वा रिक्तस्थानानि पूरयत।

(क) भवान्। पक्ववटिकादीनि खादितुम् .... (इच्छसि/इच्छन्ति/इच्छति)।

(ख) .... न श्रुतम्। (अहम्/अस्माभिः/माम्)

(ग) हरणरामदत्तौ अट्टहासं रोद्धुं .... । (प्रयतते/प्रयतेते/प्रयतसे)।

(घ) नेत्राभ्यां संसारं .... (दर्शिष्यामि/द्रक्ष्यामि)

(ङ) सोमधरः त्वां .... (आनीतः आनीतवान्/आनीतम्)।

9. अधोलिखितानां कथनानां वक्ता कः/का?

	कथनम्	वक्ता
(क)	तत्क्षमन्तामन्नदातारः	–
(ख)	तात! सोमधरः मयि स्निह्यति	–
(ग)	अये यो गुणवान् स एव सभ्यः स एव धनिकः स एव आदरणीयः	–
(घ)	त्वं पुनः शिशुरिव धैर्यहीना जायसे	–
(ङ)	पितृव्यचरण! स्वपितुः शाकशकट्याः सज्जा मयैव करणीया वर्तते।	–

(च) वत्स सोमधर! सत्यमेवासि त्वं
कन्थामाणिक्यम्।		–

योग्यताविस्तारः

(क) पाठगतस्य आशयस्य स्थिरीकरणाय अधोलिखितसूक्तयः दीयन्ते ।

(क) सम्पत्तौ च विपत्तौ च महतामेकरूपता।

(ख) आपत्सु मित्रं जानीयात्।

(ग) उत्सवे व्यसने चैव दुर्भिक्षे राष्ट्रविप्लवे।
राजद्वारे श्मशाने च यस्तिष्ठति स बान्धवः।।

(घ) न कश्चित्कस्यचिन्मित्रं न कश्चित्कस्यचिद्रिपुः।
व्यवहारेण मित्राणि जायन्ते रिपवस्तथा।।

(ङ) न मातरि न दारेषु न सोदर्ये न चात्मजे।
विश्वासस्तादृशः पुंसां यादृङ्मित्रे स्वभावजे।।

(च) मित्रं प्रीतिरसायनं नयनयोरानन्दनं चेतसः
पात्रं यत्सुखदुःखयोः सह भवेन्मित्रेण तद्दुर्लभम्।
ये चान्ये सुहृदः समृद्धिसमये द्रव्याभिलाषाकुला-
स्ते सर्वत्र मिलन्ति तत्त्वनिकषग्रावा तु तेषां विपत्।।

(ख) अस्य रूपकस्य संवादानां नाट्यप्रस्तुतये अभ्यासः कार्यः।


11116CH11

एकादशः पाठः

ईशः कुत्रास्ति

प्रस्तुत पाठ नोबेल पुरस्कार विजेता कवीन्द्र रवीन्द्रनाथ टैगोर की विश्वविख्यात कृति **गीताञ्जलि** के संस्कृत अनुवाद से संकलित है। इसमें कवि ने ईश्वर की वास्तविक सत्ता को किसानों, मज़दूरों और गरीबों में दर्शाया है। इसके अनुवादक को. ल. व्यासराय शास्त्री हैं।

देवागारे पिहितद्वारे
तमोवृतेऽस्मिन् भजसे कम् ?
त्यज जपमालां त्यज तव गानं
नास्त्यत्रेशः स्फुटय दृशम्।।



तत्रास्तीशः, कठिनां भूमिं
यत्र हि कर्षति लाङ्गलिकः।
यत्र च जनपदरथ्याकर्ता
प्रस्तरखण्डान् दारयते।।

ईशस्तिष्ठति वर्षातपयो-
स्ताभ्यां सार्धं मलिनवपुः।
दूरे क्षिप तव शुद्धां शाटी-
मेहि स इव पांसुरभूमिम्॥

मुक्तिः? क्व नु सा दृश्या मुक्तिः!
सलीलमीशः सृजति भुवम्।
तिष्ठति चास्मद्धिताभिलाषी
सविधेऽस्माकं मिषन् सदा॥

ध्वानं हित्वा बहिरेहि त्वं
त्यज तव कुसुमं त्यज धूपम्।
पश्यंस्तिष्ठ स्वेदजलार्द्र-
स्तन्निकटे कार्यक्षेत्रे॥

यदि तव वसनं धूसरितं स्यात्
यदि च सहस्त्रच्छिद्रं स्यात्।
का वा क्षतिरिह तेन भवेत्ते
तत्त्वमिदं चिन्तय चित्ते॥

शब्दार्थाः टिप्पण्यश्च

देवागारे	–	देवस्य आगारे, देवमन्दिर में।
पिहितद्वारे	–	पिहितं द्वारं यस्य तत् तस्मिन्, बन्द दरवाजे वाले (में)।
तमोवृते	–	तमसावृते, अन्धकार से आच्छादित (में)।
जपमालाम्	–	जपाय मालाम्, मन्त्रादि के जपने की माला को।
नास्त्यत्रेशः	–	न + अस्ति + अत्र + ईशः, यहाँ ईश्वर नहीं है।
स्फुटय	–	खोलो।
दृशम्	–	दृष्टि (आँखें) को।
तत्रास्तीशः	–	तत्र+ अस्ति + ईशः, ईश्वर वहाँ है।

कर्षति – हल चलाता है।
लाङ्गलिकः – हलवाहा।
जनपदरथ्याकर्ता – जनपदस्य रथ्यायाः कर्ता, जनपद की सड़क बनाने वाला।
प्रस्तरखण्डान् – प्रस्तराणां खण्डान्, पत्थरों के टुकड़ों को।
दारयते – तोड़ता है।
ईशस्तिष्ठति – ईशः + तिष्ठति।
वर्षातपयोः – वर्षा च आतपश्च वर्षातपौ तयोः, वर्षा और धूप में।
मलिनवपुः – मलिनं वपुः यस्य सः अर्थात् दीनः, मैलयुक्त शरीर वाला अर्थात् दीन।
शुद्धाम् – साफ़ (स्वच्छ)।
शाटीम् – साड़ी को।
पांसुरभूमिम् – धूलिधूसरित ज़मीन पर।
सलीलम् – लीलया सह, लीला (क्रीडा) के साथ।
चास्मद्धिताभिलाषी – च + अस्मद् + हित + अभिलाषी, अस्माकं हितस्य अभिलाषी, हमारा हित चाहने वाला।
सविधे – समीप में।
मिषन् – देखता हुआ।
बहिरेहि – बहिः एहि, बाहर आओ।
पश्यंस्तिष्ठ – पश्यन् + तिष्ठ, देखते रहो।
स्वेदजलार्द्रः – स्वेदजलेन आर्द्रः, पसीने से लतपथ।
तन्निकटे – तत् + निकटे, उसके समीप में।
कार्यक्षेत्रे – कार्यस्य क्षेत्रे, कार्य करने की जगह पर।
वसनम् – वस्त्र।
सहस्रच्छिद्रम् – सहस्राणि छिद्राणि यस्मिन् तत्, हजारों छिद्रों वाला (फटा-पुराना)।
क्षतिः – हानि।
तत्त्वमिदम् – तत्त्वम् + इदम्, इस तत्त्व को।
चिन्तय – विचार करो।
चित्ते – चित्त में (मन में)।

अभ्यासः

1. **संस्कृतभाषया उत्तरं दीयताम्।**
   (क) ईशः कुत्रास्ति? इति पाठः कस्माद् ग्रन्थात्सङ्कलितः?
   (ख) लाङ्गलिकः किं करोति?
   (ग) प्रस्तरखण्डान् कः दारयते?
   (घ) ईश्वरः काभ्यां सार्द्धं तिष्ठति?
   (ङ) कविः जनान् कुत्र गन्तुं प्रेरयति?
   (च) कविः किं चिन्तयितुं कथयति?

2. **"तत्रास्तीशः कठिनां भूमिं ………… दारयते"। इत्यस्य काव्यांशस्य व्याख्या हिन्दीभाषया कर्तव्या।**

3. **रिक्तस्थानानि पूरयत।**
   (क) अस्मिन् ………………………… कं भजसे।
   (ख) स्वेदजलार्द्रः ………………………… तिष्ठ।
   (ग) ध्यानं हित्वा ………………………… एहि।
   (घ) यदि तव ………………………… धूसरितं स्यात्।

4. **अधोलिखितपदानां वाक्येषु प्रयोगं कुरुत।**
   सार्द्धम्, सविधे, हित्वा, एहि, धूसरितम्, भवेत्।

5. **अधोलिखितेषु सन्धिं कुरुत।**
   तमोवृते + अस्मिन् = ………………
   ईशः + तिष्ठति = ………………
   बहिः + एहि = ………………

6. **अधोऽङ्कितेषु सन्धिविच्छेदं कुरुत।**
   नास्त्यत्रेशः = ………… + …………
   पश्यंस्तिष्ठ = ………… + …………
   तन्निकटे = ………… + …………

7. **ईशस्तिष्ठति ……… पांसुरभूमिम्, इत्यस्य श्लोकस्य अन्वयं लिखत।**

योग्यताविस्तारः

(क) पाठगतस्य आशयस्य स्थिरीकरणाय अधोलिखितसूक्तयः दीयन्ते

मनः क्षोभं न कस्यापि
प्रकुर्वीत कथञ्चन।
आर्तोच्छ्वासैर्हि दीनानां
जगत् सर्वं प्रणश्यति॥1॥

बद्धाञ्जलिपुटा भृत्या
वित्तेशान् समुपासते।
तेभ्यस्तु ते महीयांसः
कुर्वते ये श्रमार्चनम्॥2॥

सम्भरणेन दीनानां
विपदाशु विलीयते।
ह्रियन्तेऽदातृ - वित्तानि
हिंसकेर्दस्युभिर्बलात्॥3॥

दीनं प्रति घृणाभावः
कर्त्तव्यो न कदाचन।
कृपापात्रं स ते भक्तः
पापकर्मा भवन्नपि॥4॥

अशक्तमपि कार्येषु
अशक्तं मावगच्छ माम्।
समर्थ इति मत्वा मां
व्यवहारं कुरुष्व भोः॥5॥

(ख) पाठस्य भावं चेतसि प्रवर्धनाय कानिचित् समभावगीतानि अपि श्राव्यसाधनैः श्रावयितव्यानि।

द्वादशः पाठः

गान्धिनः संस्मरणम्

11116CH12

राष्ट्रपिता महात्मा गांधी ने 36 वर्ष की आयु में अपने संस्मरणों को एकत्रित कर अपनी आत्मकथा मातृभाषा गुजराती में लिखी। इसके अनन्तर विश्व की अनेक भाषाओं में इसका अनुवाद किया गया। स्वयं गांधी जी ने श्रीनिवास शास्त्री के सहयोग से इसका परिशोधन किया। गांधी जी के अनुसार उनकी आत्मकथा आत्मपरीक्षण के रूप में है।

पण्डित होसकेरे नागप्प शास्त्री जी ने गांधी जी की आत्मकथा को संस्कृत भाषा में **'सत्यशोधनम्'** नामक ग्रन्थ के रूप में अनूदित किया।

प्रस्तुत पाठ इसी ग्रन्थ से लिया गया है। इसमें यह वर्णित किया गया है कि बचपन में गांधी जी किस प्रकार श्रवणकुमार की मातृ-पितृभक्ति एवं सत्यवादी राजा हरिश्चन्द्र की सत्यनिष्ठा से अभिभूत हुए।



मम पित्रा क्रीत्वा स्थापितस्य श्रवणपितृभक्त्याख्यनाटकग्रन्थस्योपरि

कथमपि मे दृष्टिरपतत्। तमेनं तत्परतयाहमपठम्। तत्कालमेव ग्रामाद्ग्रामं पर्यटन्तः पुत्तलिकाप्रदर्शनोपजीविनः केचिदस्मद्ग्राममुपागमन्। तत्प्रदर्शित- पुत्तलिकासु यात्रामुद्दिश्य स्कन्धावलम्बिवीवधेन स्वमातापितरौ वहमानस्य श्रवणस्य प्रतिकृतिरेका अवलोकिता। एतत्पुस्तकं पुत्तलिका चेति द्वयं मिलित्वा श्रवणकथां मे मनसः कदाप्यप्रमार्जनीयामकरोत्। श्रवणस्य पितृभक्तिरादर्शरूपेण त्वया स्थापनीयेत्यात्मनात्मानमबोधयम्। श्रवणस्य मरणेन सन्तप्यमानयोस्तत्पित्रोर्विलापोऽद्यापि मे मनसि पुनःपुनः श्रूयते इव। मदर्थे पित्रा वितीर्णेन वाद्येन तमहमालापयम्। स रागो मे हृदयं तन्मयमकरोत्।

नाटकान्तरसम्बन्धिन्यपरा तत्सदृशी घटनैका संवृत्ता। एतत्कालमेव कयापि नाटकमण्डल्या प्रयुक्तं नाटकमवलोकयितुं पितुरनुज्ञाम् अध्यगच्छम्। तन्नाटकं हरिश्चन्द्रचरितात्मकमासीत्। तदेतल्लोचनासेचनकं मम मानसमकर्षत्। किन्त्वनुज्ञां कतिकृत्वः प्राप्य गन्तुं शक्येत। तथाप्येतन्निमित्तं व्यसनं नैव माममुञ्चत्। निस्संख्यवारमिदं नाटकं मया स्वयं मनसा प्रयुक्तं स्यात्। हरिश्चन्द्रेणेव सर्वैरपि कस्मात् सत्यवद्भिर्न भवितव्यम्। इत्येष प्रश्नो दिवानिशं मे मनसि पुनःपुनः अस्फुरत् सत्यानुसरणं सत्यस्यार्थे हरिश्चन्द्रवन्निर्विकल्पेन मनसा क्लेशानामनुभवः। इत्येष आदर्श एक एव मे मनस्याविरभूत्। हरिश्चन्द्रकथायामक्षरशः सत्यत्वप्रतीतिरासीत्। सर्वस्यास्य स्मरणमनेकशो मे नेत्राभ्यामश्रूणि निस्सारितानि। हरिश्चन्द्रश्रवणावुभावपि मम हृदये नित्यसंनिहितौ स्तः। अद्यापि तन्नाटकपाठेन पूर्ववन्मे हृदयं विलीयत इत्यहं जाने॥

शब्दार्थाः टिप्पण्यश्च

क्रीत्वा – खरीदी हुई।

स्थापितस्य – रखी हुई, सुरक्षित।

श्रवणपितृभक्त्याख्य – श्रवणपितृभक्ति इति आख्या यस्य तत् नाटकम्, 'श्रवणपितृभक्ति' नाम वाले।

पर्यटन्तः	–	परि + अट् + शतृ प्र.वि.ब.व., घूमते हुए।
पुत्तलिका+प्रदर्शन+उपजीविनः	–	कठपुतली का नाच दिखा कर जीविका चलाने वाले।
उपागमन्	–	उप + आङ् + गम् + लुङ् प्र.पु. ब.व., आये।
स्कन्ध+अवलम्बि+वीवधेन	–	कन्धे पर लटकी काँवड (बँहगी)।
वहमानस्य	–	वह् + शानच् षष्ठी ए. व., ढोते हुए, उठाते हुए, ले जाते हुए।
प्रतिकृतिः	–	चित्र, फ़ोटो।
अवलोकिता	–	देखी।
कदापि+अप्रमार्जनीयाम्	–	कभी न मिटने वाली (अमिट)।
स्थापनीया + इति + आत्मना + आत्मानम् अबोधयम्	–	स्थापित करना चाहिये ऐसा स्वयं को स्वयं से ही समझाया।
सन्तप्यमानयोः	–	सम् + तप् धातु कर्मवाच्य + शानच्, तड़पते हुए (का) षष्ठी द्वि.व. दुखी होते हुए (का)।
तत्पित्रोः+विलापः+अद्यापि	–	उसके माता-पिता का रोदन आज भी
वितीर्णया	–	प्रदत्तया, दी गई।
आलापयम्	–	(आङ् + लप् णिच् + उ.पु. ए.व.), गाया।
अनुज्ञाम्	–	आज्ञा को (अनु + ज्ञा + अङ् टाप् द्वि. ए.व.)।
अध्यगच्छम्	–	प्राप्त किया।
तत्+एतत्+लोचन+आसेचनकम्	–	आँखों को शीतल करने वाले ऐसे उस नाटक को, नेत्रानन्ददायक उस नाटक को।
अकर्षत्	–	आकृष्ट किया।
कतिकृत्वः	–	कति + कृत्वस् अव्यय, कितनी बार।
गन्तुं शक्येत	–	शक् + कर्मवाच्य + विधि प्र.पु.ए.व., जाया जा सकता है।
व्यसनम्	–	लगन, आसक्ति।
निस्संख्यवारम्	–	अनेक बार, बहुत बार।
दिवानिशम्	–	दिवा च निशा च, तयोः समाहारः, द्वन्द्वसमासः, दिन-रात।

पुनःपुनः अस्फुरत्	–	स्फुर् + लङ् (प्र.पु. ए.व.) बार-बार उभरता हुआ।
हरिश्चन्द्रवत् निर्विकल्पेन	–	हरिश्चन्द्र के समान सच्चे (सत्यनिष्ठ)।
मनसि + आविरभूत्	–	मन में प्रकट हुआ।
निस्सारितानि	–	बहाये हैं।
विलीयते	–	लीन हो रहा है।

अभ्यासः

1. संस्कृतेन उत्तरं दीयताम्।

(क) प्रस्तुतः पाठः कस्माद् ग्रन्थात् सङ्कलितः?
(ख) गान्धिनः आत्मकथा मूलतः कस्यां भाषायां लिखिता ?
(ग) गान्धिनः आत्मकथायाः संस्कृतभाषायाम् अनुवादकः कः?
(घ) महात्मा गाँधी किन्नाम नाटकम् अपठत् ?
(ङ) गान्धिनः ग्रामं के उपागच्छन्?
(च) गान्धिनः मनसि कयोः विलापः पुनः पुनः श्रूयते स्म?
(छ) महात्मा गान्धी हरिश्चन्द्रनाटकं द्रष्टुं कस्य अनुज्ञाम् अध्यगच्छत्?
(ज) कस्य कथायां सत्यत्वप्रतीतिः आसीत्?
(झ) कौ गान्धिनः हृदये नित्यसन्निहितौ आस्ताम्?
(ञ) कीदृशस्य श्रवणस्य प्रतिकृतिः गान्धिना अवलोकिता?
(ट) गान्धिनः मनसा किं प्रयुक्तम् आसीत्?
(ठ) कः प्रश्नः गान्धिनः मनसि पुनः पुनः स्फुरति स्म?

2. रिक्त स्थानानि पूरयत।

(क) ग्रामात् ग्रामं .... पुत्तलिकाप्रदर्शनोपजीविनः उपागच्छन्?
(ख) श्रवणस्य पितृभक्तिः .... त्वया स्थापनीया।
(ग) स रागः मे .... तन्मयमकरोत्।
(घ) अनेकशः मे नेत्राभ्याम् .... विस्सारितानि।
(ङ) हरिश्चन्द्रश्रवणौ .... मम हृदये नित्यसन्निहितौ।

3. अधोलिखितेषु यथानिर्देशं पदचयनादिकं कुरुतं।

(क) अस्मात् पाठात् अव्ययपदानि चिनुत।
(ख) एतेषां शब्दानां संस्कृतवाक्ये प्रयोगं कुरुत
पर्यटनम्, उद्दिश्य, संवृत्ता, प्राप्य, भवितव्यम्
(ग) अस्मिन् पाठे कर्मवाच्ये प्रयुक्तानि क्रियापदानि चिनुत।
(घ) अधोलिखितशब्दानां समानार्थकं शब्दं लिखत
लोचनम्, पितरौ, मनः

4. अधोलिखितपदेषु सन्धिं सन्धिविच्छेदं वा कुरुत ।

(क) दृष्टिरपतत् = ... + ...
(ख) ग्रामात् + ग्रामम् = ...
(ग) कदा + अपि + अप्रमार्जनीयाम् = ...
(घ) घटनैका = ... + ...
(ङ) तत् + नाटकम् = ...
(च) इत्येष = ... + ...
(छ) मनसि + आविरभूत् = ...

5. हिन्दीभाषया आशयं स्पष्टीकुरुत ।

(क) सत्यानुसरणं सत्यस्यार्थे हरिश्चन्द्रवन्निर्विकल्पेन मनसा क्लेशानामनुभवः।
(ख) निस्संख्यवारमिदं नाटकं मया स्वयं मनसा प्रयुक्तं स्यात्।
(ग) श्रवणस्य पितृभक्तिरादर्शरूपेण त्वया स्थापनीयेत्यात्मनात्मानमबोधयम्।

योग्यताविस्तारः

(क) गान्धिनः संस्मरणम् इति पाठम् अनुसृत्य मातृभक्तेः पितृभक्तेः एवं सत्यनिष्ठायाः भावं दृढीकरणाय इमे श्लोकाः प्रस्तूयन्ते।

1. मातृमान् पितृमान् आचार्यवान् पुरुषो वेद। (*शतपथब्राह्मणात्*)

2. उपाध्यायान् दशाचार्यः
आचार्याणां शतं पिता।
सहस्रं तु पितॄन् माता
गौरवेणातिरिच्यते।। (*मनुस्मृतेः*)

3. मातृदेवो भव, पितृदेवो भव, आचार्यदेवो भव। (*उपनिषदः*)

4. माता गुरुतरा भूमेः पितोच्चतरस्तथा। (*महाभारतात्*)

5. सत्यमेवेश्वरो लोके सत्ये धर्मः सदाश्रितः।
सत्यमूलानि सर्वाणि सत्यान्नास्ति परं पदम्।। (*रामायणात्*)

6. भूमिः कीर्तिर्यशो लक्ष्मीः पुरुषं प्रार्थयन्ति हि।
सत्यं समनुवर्तन्ते सत्यमेव भजेत्ततः।। (*रामायणात्*)


7. बलं सर्वबलेभ्योऽपि सत्यमेवातिरिच्यते।
सत्यवानबलः श्रेयान् सबलात् सत्यवर्जितात्।।

त्रयोदशः पाठः

सत्त्वमाहो रजस्तमः

गीता का दिव्य संदेश किसी जाति, धर्म, सम्प्रदाय अथवा देशविशेष के लिए उपादेय नहीं है। इसका अमूल्य उपदेश सार्वभौमिक एवं सार्वकालिक है। गीता के उपदेश का अनुसरण एवं जीवन के सर्वपक्षों का समुचित विकास कर मनुष्य देवत्व (श्रेष्ठत्व) को प्राप्त कर सकता है।

गीता में जीवन के उच्चतम आदर्श को प्राप्त करने के लिए सर्वसुलभ उपदेश है। इस ग्रन्थरत्न को उपनिषदों के साररूप में स्वीकार किया गया है। हृदय की दुर्बलता पर विजय प्राप्त करने वाले अर्जुन की तरह पाठक को ऐहिक और पारमार्थिक सुखों की प्राप्ति गीता द्वारा संभव है। दार्शनिक चिन्तन, भक्तिवर्णन एवं कर्मनिष्ठा के द्वारा गीता विश्व में सर्वाधिक प्रतिष्ठित स्वरूप को प्राप्त कर चुकी है।



प्रस्तुत पाठ में जीवों में व्याप्त स्वभावजन्य श्रद्धा तथा सत्त्व-रजस्-तमो गुणोपेत भेदों का वर्णन, साथ ही श्रद्धायुक्त पुरुष, भेद एवं त्रिविध सत्त्व-रजस्-तमो गुणों से युक्त आहार, तप और दान का वर्णन किया गया है।

त्रिविधा भवति श्रद्धा देहिनां सा स्वभावजा।
सात्त्विकी राजसी चैव तामसी चेति तां शृणु॥

सत्त्वानुरूपा सर्वस्य श्रद्धा भवति भारत।
श्रद्धामयोऽयं पुरुषो यो यच्छ्रद्धः स एव सः॥

यजन्ते सात्त्विका देवान्यक्षरक्षांसि राजसाः।
प्रेतान्भूतगणांश्चान्ये यजन्ते तामसा जनाः॥

अशास्त्रविहितं घोरं तप्यन्ते ये तपो जनाः।
दम्भाहङ्कारसंयुक्ताः कामरागबलान्विताः॥

आहारस्त्वपि सर्वस्य त्रिविधो भवति प्रियः।
यज्ञस्तपस्तथा दानं तेषां भेदमिमं शृणु॥

आयुः सत्त्वबलारोग्यसुखप्रीतिविवर्धनाः।
रस्याः स्निग्धाः स्थिरा हृद्या आहाराः सात्त्विकप्रियाः॥

कट्वम्ललवणात्युष्णतीक्ष्णरूक्षविदाहिनः।
आहारा राजसस्येष्टा दुःखशोकामयप्रदाः॥

यातयामं गतरसं पूति पर्युषितं च यत्।
उच्छिष्टमपि चामेध्यं भोजनं तामसप्रियम्॥

देवद्विजगुरुप्राज्ञपूजनं शौचमार्जवम्।
ब्रह्मचर्यमहिंसा च शारीरं तप उच्यते॥

अनुद्वेगकरं वाक्यं सत्यं प्रियहितं च यत्।
स्वाध्यायाभ्यसनं चैव वाङ्मयं तप उच्यते॥

मनः प्रसाद सौम्यत्वं मौनमात्मविनिग्रहः।
भावसंशुद्धिरित्येतत्तपो मानसमुच्यते॥

श्रद्धया परया तप्तं तपस्तत्त्रिविधं नरैः।
अफलाकाङ्क्षिभिर्युक्तैः सात्त्विकं परिचक्षते॥

सत्कारमानपूजार्थं तपो दम्भेन चैव यत्॥
क्रियते तदिह प्रोक्तं राजसं चलमध्रुवम्॥

मूढग्राहेणात्मनो यत्पीडया क्रियते तपः।
परस्योत्सादनार्थं वा तत्तामसमुदाहृतम्॥

दातव्यमिति यद्दानं दीयतेऽनुपकारिणे।
देशे काले च पात्रे च तद्दानं सात्त्विकं स्मृतम्॥

यत्तु प्रत्युपकारार्थं फलमुद्दिश्य वा पुनः।
दीयते च परिक्लिष्टं तद्दानं राजसं स्मृतम्॥

अदेशकाले यद्दानमपात्रेभ्यश्च दीयते।
असत्कृतमवज्ञातं तत्तामसमुदाहृतम्॥

शब्दार्थाः टिप्पण्यश्च

श्रद्धा – (श्रत्+धा+अङ्+टाप्) आस्था, निष्ठा
देहिनाम् – (देह+इनि] (पुं.,ष.वि.बहु.व.)– जीवों का
स्वभावजा – (स्वभावात् जायते इति, स्त्री.)– स्वभाव से उत्पन्न
सात्त्विकी – (सत्त्व+ठञ्, स्त्री.)– सत्त्वगुण से युक्त, वास्तविक
राजसी – (रजसा निर्मितम्–अण्, स्त्री.) रजो गुण से प्रभावित/युक्त
तामसी – (तमोऽस्त्यस्य अण्, स्त्री.) प्रकृति के तीन गुणों में से एक, अज्ञानी
सत्त्वानुरूपा – (सत्त्वस्य अनुरूपा) सत्त्व के अनुरूप
यच्छ्रद्धः – (यस्य श्रद्धा (भवति) सः) जिसकी श्रद्धा है, वह
यजन्ते – (यज्–आत्मनेपद] यज्ञ करते हैं।

अशास्त्रविहितम् – शास्त्रेण विहितं शास्त्रविहितम्, न शास्त्रविहितम्, शास्त्र द्वारा विधान न किया हुआ

जनाः – (जन्+अच्), ब.व., मनुष्य

रक्षांसि – (रक्षस्, नपुं., बहु.व., रक्ष्+असुन्) राक्षस

दम्भाहङ्कारसंयुक्ताः – (दम्भाहङ्काराभ्यां संयुक्ताः) दंभ और अंहकार से संयुक्त

शृणु – (श्रु–श्रवणे) श्रवण करना, सुनना

रस्याः – (रस्+यत्) रस वाले, रुचिकर

स्निग्धाः – (स्निह्+क्त) चिकने

स्थिराः – (स्था+किरच्) ठहरने वाले

हृद्याः – (हृद्+यत्) हृदय को प्रिय लगने योग्य

सात्त्विकप्रियाः – (सात्त्विकानां प्रियाः) सात्त्विकों के प्रिय

आयुःसत्त्वबलारोग्य – (आयुश्च सत्त्वं च बलं च आरोग्यञ्च आयुः सत्त्वबलारोग्य), आयु सत्त्व बल आरोग्य।

सुखप्रीतिविवर्धनाः – (सुखञ्च प्रीतिश्च सुखप्रीतयः, तेषां विवर्धनाः) सुख और प्रीति को बढ़ाने वाले।

कट्वम्ललवणात्युष्ण तीक्ष्णरूक्षविदाहिनः – (कटुश्च, अम्लः च, लवणः च, अत्युष्णः च, तीक्ष्णः च, रूक्षः च, विदाही च) कड़वे, खट्टे, अतिलवणयुक्त, बहुत गर्म, तीखे, सूखे और बहुत दाह पैदा करने वाले।

इष्टाः – (इष्+क्त) अभिलषित, चाहे गए।

यातयामम् – (यातः यामः यस्य तत्)– आधा पका हुआ

गतरसम् – (गतः रसः यस्मात्)– रसरहित

पूति – (पूय्+क्तिच्) दुर्गन्धयुक्त

पर्युषितम् – (परि+वस्+क्त) बासी

उच्छिष्टम् – (उत्+शिष्+क्त) शेष, बचा हुआ, जूठा

अमेध्यम् – (न मेध्यम्)अपवित्र, अस्वच्छ

देवद्विजगुरुप्राज्ञपूजनम् – (देवद्विजगुरुप्राज्ञानां पूजनम्) देवता, ब्राह्मण, गुरु, और विद्वान् का पूजन

शौचम् – (शुचेर्भावः अण्) पवित्रता

आर्जवम् – (ऋजु+अण्) सरलता, स्पष्टवादिता

ब्रह्मचर्यम् – (ब्रह्मणि चर्या यस्य यत्) ब्रह्मचर्य

शारीरम् – (शरीर+अण्) शारीरिक, दैहिक

अनुद्वेगकरम् – (न उद्वेगकरम्) उत्तेजित नहीं करने वाला

प्रियहितम् – (प्रियं च हितं च) प्रिय और हितकारी

स्वाध्यायाभ्यसनम् – (स्वाध्यायः च अभ्यसनम् च) स्वाध्याय और अभ्यास।

वाङ्मयम् – (वाच्+मयट्) वाणी से युक्त, वाचिक

सौम्यत्वम् – (सौम्य+त्व) सौम्यता

आत्मविनिग्रहः – (आत्मनः विनिग्रहः) आत्मनियंत्रण

त्रिविधम् – तीन प्रकार का

परिचक्षते – (परि+चक्ष्, आत्मनेपद) कहता है

सत्कारमानपूजार्थम् – (सत्कारमानपूजाभ्यः इति) सत्कार, मान और पूजा के लिए।

अध्रुवम् – (न ध्रुवम्) अस्थिर, स्थायी

उत्सादनार्थम् – (उत्सादनाय इति) नाश करने के लिए।

दातव्यम् – (दा+तव्यत्) देने योग्य

अनुपकारिणे – (न उपकारिणे) उपकार न करने वाले को।

प्रत्युपकारार्थम् – (प्रति+उपकारार्थम्) प्रत्युपकार के लिए।

उद्दिश्य – (उत्+दिश्+ल्यप्) उद्देश्य करके।

परिक्लिष्टम् – (परि+क्लिश्+क्त) क्लेश युक्त।

तद्दानम् – (तत्+दानम्) वह दान।

पात्रेभ्यश्च – (पात्रेभ्यः+च) पात्रों को

असत्कृतम् – (न सत्कृतम्) अपवित्र

अवज्ञातम् – (अव+ज्ञा+क्त) अवज्ञा/ अनादर युक्त

उदाहृतम् – (उत्+आ+हृ+क्त) कहा गया

अभ्यासः

1. एकपदेन उत्तरत।

(क) श्रद्धा कतिविधा भवति?
(ख) देहिनां का स्वभावजा भवति?
(ग) आहारः कतिविधो भवति?
(घ) दुःखशोकामयप्रदाः आहाराः कस्य इष्टाः?
(ङ) कीदृशं वाक्यं वाङ्मयं तप उच्यते?
(च) देशे काले पात्रे च दीयमानं कीदृशं दानं भवति?
(छ) प्रत्युपकारार्थं यद्दानं तत् कीदृशं दानं कथ्यते?
(ज) तामसं दानं पात्रेभ्यः दीयते अपात्रेभ्यः वा?

2. पूर्णवाक्येन उत्तरत।

(क) श्रद्धा कस्य अनुरूपा भवति?
(ख) तामसा जनाः कान् यजन्ते?
(ग) के जनाः दम्भाहंकारसंयुक्ताः भवन्ति?
(घ) सात्त्विकप्रियाः आहाराः कीदृशाः भवन्ति?
(ङ) किं किं शारीरं तप उच्यते?
(च) राजसं दानं किम् उच्यते?

3. रेखाङ्कितपदानि आधृत्य प्रश्ननिर्माणं कुरुत।

(क) अयं पुरुषः <u>श्रद्धामयः</u> भवति।
(ख) सात्त्विकाः <u>देवान्</u> यजन्ते।
(ग) <u>पर्युषितं</u> भोजनं तामसप्रियं भवति।
(घ) शारीरं <u>तप</u> उच्यते।
(ङ) <u>वाङ्मयं</u> तप उच्यते।
(च) <u>यद्दानम्</u> अपात्रेभ्यः दीयते।

4. प्रकृतिप्रत्ययविभागं कुरुत।

	प्रकृतिः	प्रत्ययः
यथा–त्रिविधा –	त्रिविध	टाप्
(क) सात्त्विकी –	....	....

(ख) पर्युषितम् – ....

(ग) सौम्यत्वम् – ....

(घ) तप्तम् – ....

(ङ) दातव्यम् – ....

(च) उद्दिश्य – ....

5. पर्यायपदैः सह मेलनं कुरुत।

यथा–	**जनाः**	**मनुष्याः**
(क) देवः –	....	....
(ख) गुरुः –	....	....
(ग) प्राज्ञः –	....	....
(घ) शौचम् –	....	....
(ङ) आर्जवम् –	....	....

6. विलोमपदैः सह योजयत।

यथा– **देवः**	**दानवः**
(क) अहिंसा	अपात्रे
(ख) अनुद्वेगकरम्	असत्यम्
(ग) अभ्यसनम्	काठिन्यम्
(घ) सत्यम्	अनभ्यसनम्
(ङ) पात्रे	उद्वेगकरम्
(च) सौम्यत्वम्	हिंसा

7. विशेषणं विशेष्येण सह मेलनं कुरुत।

यथा– त्रिविधा	श्रद्धा
(क) सत्त्वानुरूपा	आहारः
(ख) तामसाः	भोजनम्
(ग) घोरम्	वाक्यम्
(घ) प्रियः	जनाः
(ङ) पर्युषितम्	तपः
(च) अनुद्वेगकरम्	श्रद्धा

8. सन्धिं सन्धिच्छेदं वा कुरुत।

(क) चैव – ....

(ख) तपो जनाः – ....

(ग) यज्ञस्तपस्तथा – ....

(घ) आहारस्त्वपि – ....

(ङ) राजसस्य+इष्टा – ....

(च) उत्+शिष्टम् – ....

(छ) वाक्+मयम् – ....

(ज) प्रति+उपकारार्थम् – ....

9. विग्रहपदानि आधृत्य समस्तपदानि रचयत।

विग्रहपदानि	समस्तपदानि
(क) न शास्त्रविहितम्	– ....
(ख) अहंकारेण संयुक्ताः	– ....
(ग) पर्युषितं भोजनम्	– ....
(घ) न उद्वेगकरम्	– ....
(ङ) प्रियं च हितं च	– ....
(च) मनसः प्रसादः	– ....

योग्यताविस्तारः

(क) श्रीमद्भगवद्गीतायां त्रिविधः विभागः कृतः। तद्यथा–

सत्त्वं रजस्तम इति गुणाः प्रकृतिसम्भवाः।
निबध्नाति महाबाहो देहे देहिनमव्ययम्॥

(श्रीमद्भगवद्गीता– 14/5)

एते त्रयः गुणाः– 1. सत्त्वम् 2.रजः 3. तमः

1. सत्त्वगुणः– **तत्र सत्त्वं निर्मलत्वात्प्रकाशकमनामयम्।**
सुखसङ्गेन बध्नाति ज्ञानसङ्गेन चानघ॥

(श्रीमद्भगवद्गीता– 14/6)

2. रजोगुणः– **रजो रागात्मकं विद्धि तृष्णासङ्गसमुद्भवम्।**
तन्निबध्नाति कौन्तेय कर्मसङ्गेन देहिनम्॥
(श्रीमद्भगवद्गीता– 14/7)

3. तमोगुणः– **तमस्त्वज्ञानजं विद्धि मोहनं सर्वदेहिनाम्।**
प्रमादालस्यनिद्राभिस्तन्निबध्नाति भारत!॥
(श्रीमद्भगवद्गीता– 14/8)

(ख) 'तपः' पदस्य मूलशब्दः 'तपस्' इति विद्यते।

एतदनुरूपशब्दाः– मनस् (मन), तमस्(अन्धकार), वचस् (वचन), रजस् (रजोगुण), यशस् (यश), सरस् (तालाब), नभस् (आकाश), इत्यादयः। एते शब्दाः नपुंसकलिङ्गे सन्ति। शब्दरूपाणि एतानि–

'तपस्' (तप) नपुंसकलिङ्गे

विभक्तिः	**एकवचने**	**द्विवचने**	**बहुवचने**
प्रथमा	तपः	तपसी	तपांसि
द्वितीया	तपः	तपसी	तपांसि
तृतीया	तपसा	तपोभ्याम्	तपोभिः
चतुर्थी	तपसे	तपोभ्याम्	तपोभ्यः
पञ्चमी	तपसः	तपोभ्याम्	तपोभ्यः
षष्ठी	तपसः	तपसोः	तपसाम्
सप्तमी	तपसि	तपसोः	तपस्सु
संबोधन	हे तपः!	हे तपसी!	हे तपांसि!

(ग) अधोलिखितैः श्लोकैः गीतायाः महत्तां ज्ञातुम् अर्हति।

सर्वोपनिषदो गावो दोग्धा गोपालनन्दनः।
पार्थो वत्सः सुधीर्भोक्ता दुग्धं गीतामृतं महत् ॥1॥

गीता सुगीता कर्तव्या किमन्यैः शास्त्रसंग्रहैः।
या स्वयं पद्मनाभस्य मुखपद्माद्विनिःसृता ॥2॥

गीताश्रयेऽहं तिष्ठामि गीता मे चोत्तमं गृहम्।
गीताज्ञानमुपाश्रित्य त्रींल्लोकान् पालयाम्यहम् ॥3॥

चतुर्दशः पाठः

नवद्रव्याणि

11116CH14

तर्क शब्द का अर्थ है– प्रमाण (यथार्थज्ञान का साधन)। जो प्रमाण के विषय हैं वे तर्क के अन्तर्गत गृहीत हैं। द्रव्यादि सप्त प्रमेय पदार्थ एवं प्रत्यक्षादि चार प्रमाण तर्क के विषय हैं। इनका संक्षेप से लक्षण एवं परीक्षा करना ही इस ग्रन्थ का मुख्य उद्देश्य है। तर्क शास्त्र व्याकरण एवं साहित्य आदि शास्त्रों के लक्षणों का पदकृत्य जानने की जिज्ञासा का उत्पादक होने से छात्रों के लिए उपयोगी है। इसके रचयिता अन्नंभट्ट हैं, इनका समय 17वीं शताब्दी माना जाता है। तर्कशास्त्र की मान्यता के अनुसार–द्रव्यादि सप्त पदार्थों के ज्ञान से लोकसिद्धि होकर निःश्रेयस अर्थात् मोक्ष प्राप्ति होती है। विश्व का समग्र ज्ञान इन सप्त पदार्थों में ही समाहित है।

'तर्कसंग्रह' न्याय एवं वैशेषिक दर्शन के प्रवेश की कुञ्जी है। वैशेषिक दर्शन को भौतिक विज्ञान के प्रति प्राचीन भारतीय योगदान का पोषक ग्रन्थ माना जाता है। छात्र प्राच्य ज्ञान की समृद्ध परम्परा से परिचय एवं उसकी अनुभूति कर सके, यही इस पाठ का उद्देश्य है।

द्रव्य–गुण–कर्म–सामान्य–विशेष–समावायाभावाः सप्त पदार्थाः।

तत्र द्रव्याणि पृथिव्यप्तेजोवाय्वाकाशकालदिगात्ममनांसि नवैव।

रूप–रस–गन्ध –स्पर्श–संख्या–परिमाण–पृथक्त्व–संयोग–विभाग–परत्वापरत्व–गुरुत्व–द्रवत्व–स्नेह–शब्द–बुद्धि–सुख–दुःखेच्छा–द्वेष–प्रयत्न–धर्माऽधर्म–संस्काराश्चतुर्विंशतिर्गुणाः।

उत्क्षेपणापक्षेपणाकुञ्चन-प्रसारण-गमनानि पञ्च कर्माणि।

परमपरं चेति द्विविधं सामान्यम्।

नित्यद्रव्यवृत्तयो विशेषास्त्वनन्ता एव।

समवायस्त्वेक एव।

अभावश्चतुर्विधः-प्रागभावः प्रध्वंसाभावोऽत्यन्ताभावोऽन्योन्या भावश्चेति।

द्रव्यलक्षणप्रकरणम्।

तत्र गन्धवती पृथिवी। सा द्विविधा नित्याऽनित्या च। नित्या परमाणुरूपा। अनित्या कार्यरूपा।

शीतस्पर्शवत्य आपः। ता द्विविधाः- नित्या अनित्याश्च। नित्याः परमाणुरूपाः। अनित्याः कार्यरूपाः।

पुनस्त्रिविधाः- शरीरेन्द्रियविषयभेदात्।

उष्णास्पर्शवत्तेजः। तच्च द्विविधं- नित्यमनित्यं च।

नित्यं परमाणुरूपम्। अनित्यं कार्यरूपम्।

पुनस्त्रिविधं- शरीरेन्द्रियविषयभेदात्।

रूपरहितः स्पर्शवान् वायुः। स द्विविधः- नित्योऽनित्यश्च।

नित्यः परमाणुरूपः अनित्यः कार्यरूपः

पुनस्त्रिविधः- शरीरेन्द्रियविषयभेदात्।

शब्दगुणकमाकाशम्। तच्चैकं विभु नित्यं च।

अतीतादिव्यवहारहेतुः कालः। स चैको विभुर्नित्यश्च।

प्राच्यादिव्यवहारहेतुर्दिक्। सा चैका। नित्या विभ्वी च।

ज्ञानाधिकरणमात्मा। स द्विविधः- जीवात्मा परमात्मा चेति। तत्रेश्वरः सर्वज्ञः। परमात्मा एक एव, जीवस्तु प्रतिशरीरं भिन्नो विभुर्नित्यश्च।

दुःखाद्युपलब्धिसाधनमिन्द्रियं मनः। तच्च

प्रत्यात्मनियतत्वादनन्तं परमाणुरूपं नित्यं च।

शब्दार्थाः टिप्पण्यश्च

द्रव्यम्	–	द्रव्यत्वजातिमत्वं गुणवत्त्वं वा द्रव्यसामान्यलक्षणम्–गुण एवं क्रिया का आधार (द्रव्य)।
समवायः	–	इहेदमिति यतः स समवायः, जिसके कारण यह इसमें है, ऐसी अनुभूति होती है, वह समवाय है। यह नित्य सम्बन्ध है जो कार्य–कारण, क्रिया–क्रियावान्, गुण–गुणी एवं जाति और व्यक्ति के बीच होता है।
अभावः	–	निषेधमुख अर्थात् नहीं है ऐसी अनुभूति का विषय 'अभाव' है। यह चार प्रकार का है– प्रागभव, प्रध्वंसाभाव, अत्यन्ताभाव, अन्योन्याभाव।
संस्कारः	–	संस्कारस्त्रिविधः– वेगः, भावना, स्थितिस्थापकश्च। **वेग**–सभी मूर्त्त द्रव्यों में होता है जैसे पृथ्वी, जल, वायु एवं मन। **भावना**– यह आत्मा का गुण है, स्मरण एवं प्रत्यभिज्ञा का कारण यही है। **स्थितिस्थापकः**–पूर्वस्थिति में लौटने का कारण, कारणभूत।
कर्म	–	चलनात्मकं कर्म– चलने का स्वभाव कर्म है। कर्म के पांच प्रकार हैं– **उत्क्षेपणम्**– उर्ध्वदशसंयोग हेतुः– उर्ध्व स्थान संयोग का कारण। **अपक्षेपणम्**–ओदेशसंयोगहेतुः–निम्नस्थान के संयोग हेतु। **आकुञ्चनम्**– शरीरस्य सन्निकृष्टसंयोगहेतुः– शरीर के संकोचरूपी संयोग का हेतु। **प्रसारणम्**–विप्रकृष्ट–संयोगहेतुः– शरीर के विस्ताररूपी संयोग का हेतु।
गमनम्	–	उत्क्षेपणादि चार प्रकार के कर्मों के अतिरिक्त समस्त प्रकार की क्रियायें गमन में स्वीकृत हैं।
प्रागभावः	–	अनादिसान्तः उत्पत्तेः पूर्व कार्यस्य– जिस अभाव का आदि नहीं हो परन्तु अन्त हो अर्थात् कार्य की उत्पत्ति से पूर्व की अवस्था।

प्रध्वंसाभावः – सादिरनन्तः उत्पत्त्यनन्तरं कार्यस्य– जिस भाव का आदि हो अन्त न हो अर्थात् कार्य के प्रध्वंस की परवर्ती अवस्था।

अत्यन्ताभावः – त्रैकालिक संसर्गाभावः– सर्वथा अभाव।

अन्योन्याभावः – तादात्म्यसम्बन्धाभावः– एक का दूसरे में अभाव यथा– घटः पटो न पटः घटो न।

विभुः/विभु/विभ्वी – पु./नपुं./स्त्री. सर्वव्यापक।

दिक् – प्राच्यादिव्यवहारहेतुः– पूर्वपश्चिम आदि दिशा।

अधिकरणम् – आधार।

प्रत्यात्मम् – आत्मनि आत्मनि इति–हर आत्मा में।

अभ्यासः

1. एकपदेन उत्तरं लिखत।

(क) पदार्थाः कति भवन्ति?

(ख) पृथिव्याः कति भेदाः उक्ताः?

(ग) तेजः कीदृशं कथ्यते?

(घ) अतीतादिव्यवहारहेतुः कः?

(ङ) आत्मा कतिविधः?

2. पूर्णवाक्येन उत्तरत।

(क) कस्मात् ग्रन्थात् सङ्गृहीतः एषः पाठः?

(ख) कानि पञ्चकर्माणि पाठे वर्णितानि?

(ग) मनः कस्य साधनम्?

(घ) वायोः कतिभेदाः?

(ङ) अतीतादिव्यवहारहेतुः कालः, स च कीदृशः?

3. मञ्जूषातः पदान्यादाय रिक्तस्थानानि पूरयत।

त्रिविधम्, गन्धवती, प्रसारण, परमाणुरूपः, अनन्तम्

(क) आपः शरीरेन्द्रियविषयभेदात्..............................भवति।

(ख) वायोः द्वौ भेदौ नित्यः..............................अनित्यः कार्यरूपश्च।

(ग) पृथिवी..............................सा नित्याऽनित्या, परमाणुरूपा कार्यरूपा च।

(घ) उत्क्षेपणाऽपक्षेपणाऽऽकुञ्चन..............................गमनानि पञ्चकर्माणि भवन्ति।

(ङ) मनः प्रत्यात्मनियतत्वात्......................परमाणुरूपं नित्यं च।

4. यथोचितं योजयत।

(क) शीतस्पर्शवत्यः – सर्वज्ञः

(ख) चतुर्विधः – रूपरहितः

(ग) ईश्वरः – अभावः

(घ) वायुः – आकाशम्

(ङ) शब्दगुणकम् – आपः

5. सन्धिविच्छेदं कृत्वा सन्धेः नाम लिखत।

नाम

(क) चैकः ....+......................... ......

(ख) प्रत्यात्मम् ....+......................... ......

(ग) तच्च ....+......................... ......

(घ) अभावश्च ....+......................... ......

(ङ) पृथिव्यप्तेजः ....+......................... ......

6. प्रदत्तपदान्यधिकृत्य वाक्यानि रचयत।

अनित्यम्, चतुर्विंशतिः, नवैव, समवायः, रूपरहितः।

7. पाठात् विपरीतार्थकपदानि चित्वा लिखत।

(क) उत्क्षेपणम्

(ख) सामान्यम्

(ग) अनित्या

(घ) पृथिवी

(ङ) अनन्तम्

8.अ. अधोलिखितपदानां मूलशब्दं, विभक्तिं, वचनं, लिङ्गं च लिखत।

(क) द्रव्याणि
(ख) मनांसि
(ग) विभ्वी
(घ) गुणाः
(ङ) लक्षणानि

आ. समस्तपदानां विग्रहं कृत्वा लिखत ।

(क) सप्तपदार्थाः
(ख) अनन्ताः
(ग) शरीरेन्द्रियविषयभेदात्
(घ) व्यवहारहेतुः
(ङ) रूपरहितः

9. कानि पञ्चकर्माणि? सोदाहरणं स्पष्टयत ।

योग्यताविस्तारः

(क) तर्कसङ्ग्रहस्य रचयिता अन्नम्भट्ट। अस्य रचना बालकानां कृते तर्कशास्त्रस्य ज्ञानार्थं कृता।

"बालानां सुखबोधाय क्रियते तर्कसङ्ग्रहः"

बालकानां कृते एषः ग्रन्थः अतीव उपयोगी अस्ति। अस्मिन् ग्रन्थे महर्षिगौतमप्रणीतन्यायदर्शनस्य एवं कणादप्रणीतवैशेषिकदर्शनस्य सिद्धान्तानां वर्णनम् अस्ति।

काणादन्यायमतयोर्बालव्युत्पत्तिसिद्धये।
अन्नम्भट्टेन विदुषा रचितस्तर्कसंग्रहः॥

महर्षिणा गौतमेन षोडशपदार्थानां चर्चा कृता कणादेन च सप्तपदार्थानां चर्चा कृता। तर्कसंग्रहेऽपि सप्तपदार्थानां वर्णनं अन्नम्भटेन कृतम्।

(ख) महर्षिणा गौतमेन वर्णिताः षोडशपदार्थाः-

1.प्रमाणम् 2.प्रमेयम् 3.संशयः 4.प्रयोजनम् 5.दृष्टान्तः 6.सिद्धान्तः 7. अव्ययः 8.तर्कः 9.निर्णयः 10.वादः 11.जल्पः 12.वितण्डा 13.हेत्वाभासः 14.छलः 15.जातिः 16.निग्रहस्थानम्

(ग) अन्नम्भट्टानुसारेण सप्तपदार्थाः-

1.द्रव्यम् 2.गुणः 3.कर्म 4.सामान्यः 5.विशेषः 6.समवायः 7.अभावः

महर्षिणा गौतमेन वर्णितषोडशपदार्थानाम् अन्तर्भावः अन्नम्भट्टस्य सप्तपदार्थेषु एव भवति।

सर्वेषां पदार्थानां सम्बन्धः विज्ञानेन सह अपि अस्ति। विज्ञाने पदार्थः (matter) इति नाम्ना वर्णितः। **यथा**-

Matter is any substance that has mass and takes up space by having volume. This includes atoms anything made up of these.

छन्द

छन्द

पद्य लिखते समय वर्णों की एक निश्चित व्यवस्था रखनी पड़ती है। यह व्यवस्था छन्द या वृत्त कहलाती है।

वृत्त के भेद

प्राय: प्रत्येक पद्य के चार भाग होते हैं, जो पाद या चरण कहलाते हैं। जिस वृत्त के चारों चरणों में बराबर वर्ण हों, वे समवृत्त कहलाते हैं। जिसके प्रथम और तृतीय तथा द्वितीय और चतुर्थ चरण वर्णों की दृष्टि से समान हों, वे अर्धसमवृत्त हैं। जिसके चारों चरणों में वर्णों की संख्या समान न हो, वे विषमवृत्त कहे जाते हैं।

गुरु लघु व्यवस्था

छन्द की व्यवस्था वर्णों पर आधारित रहती है, मुख्यत: स्वर वर्ण पर। ये वर्ण छन्द की दृष्टि से दो प्रकार के होते हैं– लघु और गुरु। सामान्यत: ह्रस्व स्वर लघु होता है और दीर्घ स्वर गुरु। किन्तु कुछ परिस्थितियों में ह्रस्व स्वर लघु न होकर गुरु माना जाता है। छन्द में गुरु–लघु व्यवस्था का नियम इस प्रकार है– अनुस्वारयुक्त, दीर्घ, विसर्गयुक्त, संयुक्तवर्ण के पूर्व का वर्ण गुरु होता है। शेष सभी वर्ण लघु होते हैं। छन्द के किसी पाद का अंतिम वर्ण लघु होने पर भी आवश्यकतानुसार गुरु मान लिया जाता है।

सानुस्वारश्च दीर्घश्च विसर्गी च गुरुर्भवेत्।
वर्ण: संयोगपूर्वश्च तथा पादान्तगोऽपि च॥

गुरु एवं लघु के लिए अधोलिखित चिह्न प्रयुक्त होते हैं–

गुरु – ऽ

लघु – ।

यति व्यवस्था

छन्द में जिस-जिस स्थान पर किञ्चिद् विराम होता है, उसको 'यति' कहते हैं। विच्छेद, विराम, विरति आदि इसके नामान्तर हैं।

यतिर्जिह्वेष्टविश्रामस्थानं कविभिरुच्यते।
सा विच्छेदविरामाद्यैः पदैर्वाच्या निजेच्छया।।

गण व्यवस्था

आदिमध्यावसानेषु भजसा यान्ति गौरवम्।
यरता लाघवं यान्ति मनौ तु गुरुलाघवम्।।

तीन वर्णों का एक गण माना जाता है। गुरु-लघु के क्रम से गण आठ प्रकार के होते हैं।

भगण	-	ऽ।।	**जगण**	-	।ऽ।
सगण	-	।।ऽ	**यगण**	-	।ऽऽ
रगण	-	ऽ।ऽ	**तगण**	-	ऽऽ।
मगण	-	ऽऽऽ	**नगण**	-	।।।

क. वैदिक छन्द

वैदिक मन्त्रों में गेयता का समावेश करने के लिए जिन छन्दों का प्रयोग हुआ है उनमें गायत्री, अनुष्टुप् तथा त्रिष्टुप् प्रमुख हैं।

गायत्री लक्षण : जिस छन्द के तीन चरण हों, प्रत्येक चरण में आठ वर्ण हों वह गायत्री छन्द होता है। इसका पाँचवाँ वर्ण लघु तथा छठा वर्ण गुरु होता है। उदाहरण-

पावका नः सरस्वती वाजेभिर्वाजिनीवती।
यज्ञं वष्टु धिया वसुः।।

(*यजुर्वेदः -40/1*)

अनुष्टुप् लक्षण : अनुष्टुप् छन्द में चार चरण होते हैं, प्रत्येक चरण में आठ वर्ण होते हैं।

सङ्गच्छध्वं संवदध्वं सं वो मनांसि जानताम्।
देवा भागं यथा पूर्वे सञ्जानाना उपासते ।।

त्रिष्टुप् लक्षण : जिस छन्द के चार चरण हों और प्रत्येक चरण में ग्यारह अक्षर हों वह त्रिष्टुप् छन्द होता है। उदाहरण–

समानो मन्त्रः समितिः समानी समानं मनः सह चित्तमेषाम्
समानं मन्त्रमभिमन्त्रये वः समानेन वो हविषा जुहोमि॥

(*ऋग्वेदः 10/192/3*)

ख. लौकिक छन्द

प्रस्तुत पुस्तक के पाठों में अनेक लौकिक छन्दों को भी संकलित किया गया है। अतः संकलित श्लोकों के छन्दों के लक्षण तथा उदाहरण प्रस्तुत हैं–

1. **अनुष्टुप् लक्षण–आठ वर्णों वाला समवृत्त**

   अनुष्टुप् छन्द के सभी चारों चरणों का पाँचवाँ वर्ण लघु, छठा वर्ण गुरु तथा प्रथम एवं तृतीय चरण का सातवाँ वर्ण गुरु और द्वितीय एवं चतुर्थ चरण का सातवाँ वर्ण लघु होता है। इसे श्लोकछन्द भी कहते हैं। उदाहरण–

   पतितैः पतमानैश्च, पादपस्थैश्च मारुतः।
   कुसुमैः पश्य सौमित्रे! क्रीडन्निव समन्ततः॥

   (*रामायणम्*)

2. **इन्द्रवज्रा लक्षण– (ग्यारह वर्णों वाला समवृत्त)**

   जिस छन्द के प्रत्येक पाद में दो तगण, एक जगण और दो गुरु वर्ण क्रम से हों वह इन्द्रवज्रा छन्द होता है।

   स्यादिन्द्रवज्रा यदि तौ जगौ गः।

   उदाहरण–

   हंसो यथा राजतपञ्जरस्थः, सिंहो यथा मन्दरकन्दरस्थः।
   वीरो यथा गर्वितकुञ्जरस्थश्चन्द्रोऽपि बभ्राज तथाम्बरस्थः॥

   (*रामायणम्*)

3. **उपेन्द्रवज्रा लक्षण– (ग्यारह वर्णों का समवृत्त)**

   जिस छन्द के प्रत्येक पाद में क्रमशः एक जगण, एक तगण, एक जगण और दो गुरु वर्ण हों वह उपेन्द्रवज्रा छन्द होता है।

उपेन्द्रवज्रा जतजास्ततो गौ। उदाहरण–

त्वमेव माता च पिता त्वमेव
त्वमेव बन्धुश्च सखा त्वमेव।
त्वमेव विद्या द्रविणं त्वमेव
त्वमेव सर्वं मम देव-देव।

4. उपजाति लक्षण– (ग्यारह वर्णों वाला समवृत्त)

जिस छन्द में इन्द्रवज्रा तथा उपेन्द्रवज्रा के चरणों का मिश्रण होता है वह उपजाति छन्द होता है।

अनन्तरोदीरितलक्ष्मभाजौ पादौ यदीयावुपजातयस्ताः।
इत्थं किलान्यास्वपि मिश्रितासु वदन्ति जातिष्विदमेव नाम ॥

इस छन्द का प्रथम तथा तृतीय चरण उपेन्द्रवज्रा छन्दानुसार तथा द्वितीय एवं चतुर्थ चरण इन्द्रवज्रानुसार हैं। अतः इसे उपजाति छन्द कहा जा सकता है।

उदाहरण–

अस्त्युत्तरस्यां दिशि देवतात्मा, *(इन्द्रवज्रा)*
हिमालयो नाम नगाधिराजः। *(उपेन्द्रवज्रा)*
पूर्वापरौ तोयनिधीवगाह्य,
स्थितः पृथिव्या इव मानदण्डः॥ *(कुमारसम्भवम्)*

5. मालिनी लक्षण– (पन्द्रह वर्णों वाला समवृत्त)

जिस छन्द के प्रत्येक चरण में क्रमशः दो नगण, एक मगण तथा दो यगण हों वह मालिनी छन्द होता है। इसके प्रत्येक चरण में आठवें तथा तदनन्तर सातवें अर्थात् चरण के अन्तिम वर्ण पन्द्रहवें वर्ण के बाद यति (विराम) होती है। **ननमयययुतेयं मालिनी भोगिलोकेः।**

उदाहरण–

मम हि पितृभिरस्य प्रस्तुतो ज्ञातिभेद-
स्तदिह मयि तु दोषो वक्तृभिः पातनीयः।
अथ च मम स पुत्रः पाण्डवानां तु पश्चात्
सति च कुलविरोधे नापराध्यन्ति बालाः॥ *(पञ्चरात्रम्)*

अलङ्कार

लोक में जिस प्रकार आभूषण शरीर की शोभा बढ़ाने में सहायक होते हैं उसी प्रकार काव्य में उपमादि अलंकार उसकी चारुता की अभिवृद्धि करते हैं। वस्तुतः काव्य के शोभादायक तत्व को ही अलंकार कहते हैं।

शब्दार्थयोरस्थिरा ये धर्माः शोभातिशयिनः।
रसादीनुपकुर्वन्तोऽलङ्कारास्तेऽङ्गदादिवत्॥

शब्द तथा अर्थ को काव्य का शरीर कहा गया है। अतः काव्य-शरीर का अलंकरण भी शब्द तथा अर्थ दोनों रूपों में होता है। जो अलंकार शब्दों के द्वारा काव्य में चारुता की अभिवृद्धि करते हैं वे शब्दालंकार कहे जाते हैं जैसे अनुप्रास, यमक आदि। जो अलंकार अर्थ के द्वारा काव्य की चारुता की अभिवृद्धि करते हैं वे अर्थालंकार कहे जाते हैं, जैसे उपमा, रूपक आदि। इन दोनों प्रकार के अलंकारों का प्रस्तुत संकलन के पाठों में प्रयोग हुआ है। कुछ उदाहरण प्रस्तुत हैं–

अनुप्रासः

वर्णसाम्यमनुप्रासः। (*काव्यप्रकाशः*)

समान वर्णों की आवृत्ति को अनुप्रास अलंकार कहा जाता है।

उदाहरण –

वहन्ति वर्षन्ति नदन्ति भान्ति ध्यायन्ति नृत्यन्ति समाश्वसन्ति।
नद्यो घना मत्तगजा वनान्ताः प्रियाविहीनाः शिखिनः प्लवंगाः॥

(*रामायणम्*)

इस श्लोक में आए हुए वहन्ति, वर्षन्ति, नदन्ति, भान्ति, ध्यायन्ति, नृत्यन्ति तथा समाश्वसन्ति इन शब्दों में अनेक वर्णों की समान आवृत्ति है जो श्लोक की चारुता की अभिवृद्धि में सहायक है। अतः यहाँ पर **अनुप्रास** अलंकार है।

यमकः

सत्यर्थे पृथगर्थायाः स्वरव्यञ्जनसंहतेः।
क्रमेण तेनैवावृत्तिर्यमकं विनिगद्यते॥ (*साहित्यदर्पणम्*)

जब वर्ण समूह की उसी क्रम से पुनरावृत्ति की जाए किंतु आवृत्त वर्ण समुदाय या तो भिन्नार्थक हो या अंशतः अथवा पूर्णतः निरर्थक हो तो यमक अलंकार कहलाता है। उदाहरण–

प्रकृत्या हिमकोशाढ्यो दूरसूर्यश्च साम्प्रतम्।
यथार्थनामा सुव्यक्तं हिमवान् हिमवान् गिरिः॥

इस श्लोक में हिमवान् शब्द की आवृत्ति हुई है और दोनों पद भिन्नार्थक हैं। अतः यहाँ पर प्रयुक्त अंलकार यमक है जो श्लोक के सौंदर्य की अभिवृद्धि में सहायक है।

उपमा

साधर्म्यमुपमा भेदे। (*काव्यप्रकाशः, 10, 87*)
दो वस्तुओं में, भेद रहने पर भी, जब उनकी समानता प्रतिपादित की जाती है तो वहाँ उपमा अलंकार होता है। उदाहरण–

रविसंक्रान्तसौभाग्यस्तुषारारुणमण्डलः।
निःश्वासान्ध इवादर्शश्चन्द्रमा न प्रकाशते॥ (*रामायणम्*)

यहाँ पर सूर्य के प्रकाश से मलिन चन्द्रमा की उपमा निःश्वासों से मलिन आदर्श (दर्पण) से दी गई है। यह उपमा श्लोक के अर्थ की चारुता की वृद्धि में सहायक है।

उपमा में चार तत्त्व होते हैं–

1. उपमेय - जिसकी समानता बताई जाए
2. उपमान - जिससे समानता बताई जाए
3. साधारण धर्म - उक्त दोनों में समान गुण
4. वाचक शब्द - समानता प्रकट करने वाले शब्द– इव यथा आदि।

रूपकम्

तद्रूपकमभेदो य उपमानोपमेययोः। (*काव्यप्रकाशः, 10,93*)

अतिशय सादृश्य के कारण जहाँ उपमेय को उपमान का रूप दे दिया जाये अथवा उपमेय पर उपमान का आरोप कर दिया जाये वहाँ रूपक अलंकार होता है। उदाहरण–

अनलंकृतशरीरोऽपि चन्द्रमुख आनन्दयति मम हृदयम्।

सौवर्णशकटिका पाठ के इस वाक्य में प्रयुक्त चन्द्रमुख शब्द में रूपक अलंकार है। यहाँ पर मुख पर चन्द्रमा का आरोप होने से रूपक अलंकार है।

उत्प्रेक्षा

''भवेत् सम्भावनोत्प्रेक्षा प्रकृतस्य परात्मना।।

(*साहित्यदर्पणम्*)

पर (उपमान) के द्वारा प्रकृत (उपमेय) की सम्भावना (उत्कट सन्देह) को उत्प्रेक्षा अलंकार कहते हैं।

उदाहरण–

पतितैः पतमानैश्च पादपस्थैश्च मारुतः।
कुसुमैः पश्य सौमित्रे! क्रीडन्निव समन्ततः।। (*रामायणम्*)

यहां पर वायु के द्वारा पुष्पों के साथ की जाने वाली क्रीडा की सम्भावना में उत्प्रेक्षा अलंकार है।

अर्थान्तरन्यासः
भवेदर्थान्तरन्यासोऽनुषक्तार्थान्तराभिधा।

(*चन्द्रालोकः, 5.66*)

मुख्य अर्थ का समर्थन करने वाले अर्थान्तर (दूसरे वाक्यार्थ) का प्रतिपादन (न्यास) अर्थान्तरन्यास कहलाता है। उदाहरण–

यः स्वभावो हि यस्यास्ति स नित्यं दुरतिक्रमः।
श्वा यदि क्रियते राजा तत्किं नाश्नात्युपानहम्॥

यहाँ पर पूर्वार्द्ध के वाक्यार्थ का समर्थन उत्तरार्द्ध के वाक्यार्थ द्वारा किया गया है। अतः यहाँ अर्थान्तरन्यास अलंकार है।

अतिशयोक्तिः

सिद्धत्वेऽध्यवसायस्यातिशयोक्तिर्निगद्यते।

(*साहित्यदर्पणम्, 10.46*)

अध्यवसाय के सिद्ध उपमेय के लिए केवल उपमान का ही कथन होने पर अतिशयोक्ति अलंकार होता है। अध्यवसाय का तात्पर्य है– उपमेय के निगरण के साथ उपमान से अभेद का आरोप अर्थात् उपमेय तथा उपमान में अभेद की स्थापना ।

उदाहरण–

यूथेऽपयाते हस्तिग्रहणोद्यतेन केन कलभो गृहीतः।

यहाँ पर अर्जुन को हस्ती तथा अभिमन्यु को कलभ (हाथी का बच्चा) के रूप में प्रस्तुत किया गया है। इस प्रकार उपमेय अर्जुन व अभिमन्यु का निगरण कर उन्हें उपमान हस्ती तथा कलभ के रूप में प्रस्तुत किया गया है। अतः यहाँ अतिशयोक्ति अलंकार है।

अनुशंसित ग्रन्थ

क्र.सं.	ग्रन्थनाम	लेखक	संपादक/प्रकाशक
1.	**ऋग्वेदः**		सं प्र. एन. एस. सोनटक्के, वैदिक संशोधन मण्डल, पूना – 2, 1946
2.	**यजुर्वेदः**	उव्वटमहीधरभाष्य	चौखम्बा प्रकाशन, वाराणसी, 1912
3.	**अथर्ववेदः**		सातवलेकर, पारडी, 1957
4.	**रामायणम्**	वाल्मीकि	चौखम्बा प्रकाशन, वाराणसी, 1977
5.	**महाभारतम्**	व्यास	भण्डारकर प्राच्यविद्यासंशोधन संस्थानम् पुण्यपत्तनम् (पूना) 1975
6.	**जातकमाला**	आर्यशूर	सूर्यनारायण चौधरी, मोतीलाल बनारसीदास, दिल्ली, 1971
7.	**मृच्छकटिकम्**	शूद्रक	निर्णयसागर प्रेस, मुम्बई
8.	**मृच्छकटिक**	शूद्रक	मोहन राकेश (हिंदी अनुवादक) राजकमल प्रकाशन, नयी दिल्ली, 1962
9.	**चरकसंहिता**	चरक	चौखम्बा संस्कृत संस्थान, वाराणसी, 1984
10.	**भवानी भारती**	अरविन्द	अरविन्दाश्रम, पाण्डिचेरी
11.	**पुरुषपरीक्षा**	विद्यापति	खेमराज श्रीकृष्णदास, मुम्बई
12.	**सत्यशोधनम्**	पं. होसकेरे	गाँधी स्मारक निधि, नयी दिल्ली
		नागप्पशास्त्री	(भारतीय विद्या भवन, मुम्बई, 1965)
13.	**रूपरुद्रीयम्**	प्रो. राजेन्द्र मिश्र	वैजयन्त प्रकाशन, इलाहाबाद
14.	**तदेव गगनं सैवधरा**	प्रो. श्रीनिवास रथ	राष्ट्रिय संस्कृत संस्थानम्, नयी दिल्ली
15.	**गीताञ्जलिः** (संस्कृतानुवाद)		को.ल. व्यासराय शास्त्री

16. संस्कृत ड्रामा इन इट्स ओरिज़न एण्ड थ्योरी डेवेलपमेंट	ए.बी.कीथ	ऑक्सफोर्ड प्रेस, लदन, 1924
17. संस्कृत नाटक	ए.बी.कीथ	उदय भानु सिंह (हिंदी अनुवाद), मोतीलाल बनारसीदास, दिल्ली,
18. संस्कृत साहित्य का इतिहास	बलदेव उपाध्याय	शारदा मन्दिर, वाराणसी, 1973
19. वैदिक साहित्य और संस्कृति	बलदेव उपाध्याय	शारदा मंदिर, वाराणसी, 1973
20. हिस्ट्री ऑफ़ क्लासिक्ल संस्कृत लिटरेचर	एम. कृष्णामचार्य	मोती लाल बनारसीदास, दिल्ली
21. ए हिस्ट्री ऑफ़ संस्कृत लिटरेचर	ए.ए. मैकडोनेल	मोती लाल बनारसीदास, दिल्ली 1962
22. संस्कृत साहित्य का इतिहास	वाचस्पति गैरोला	चौखम्बा विद्याभवन, वाराणसी, 1978
23. संस्कृत साहित्य का अभिनव इतिहास	राधावल्लभ त्रिपाठी	विश्वविद्यालय प्रकाशन, चौक, वाराणसी, 2001
24. संस्कृत और राष्ट्र की एकता		राधावल्लभ त्रिपाठी, अक्षयवट प्रकाशन बलरामपुर हाऊस इलाहाबाद, 1991
25. संस्कृत रवीन्द्रम्		वी. राघवन्, साहित्य अकादमी, रवीन्द्रभवन, नयी दिल्ली, 1966

टिप्पणी